४३६५

पातञ्जलवृत्तिः

पत्र २५

ग्रंथपरिमाणं स १६० काकलनाद ५ पत्र ५

पा
ती
१

ॐ नमो भगवते वासुदेवाय ॥ ॐ देहार्द्धयोगः शिवयोः
स श्रेयांसि तनोतु वः दुष्प्रापमपि यत्स्मरणाज्जनः कैवल्य
मश्नुते त्रिविधान्यपि दुःखानि यदनुस्मरणान्नृणाम्
प्रयान्ति सद्यो विलयं तं स्तुमः शिवमव्ययम् पतंजलिमु
नेरुक्तिः काप्यपूर्वा जयत्यसौ पुंप्रकृत्योर्वियोगोपियो
ग इत्युदितो यया जयंति वाचः फणिभर्त्तुरान्तरस्फुरत्तम
स्तोमनिशाकरत्विषः विभाव्यमानाः सततं मनोधियः
सतां सदानंदमयानि कुर्वते शब्दानामनुशासनं विदध
ता पातंजले कुर्वता वृत्तिं राजमृगांकसंज्ञकमपि व्यात
न्वता वैद्यके वाक्चेतोवपुषां मलः फणिभृतां भर्त्रेव ये
नोद्धृतस्तस्य श्रीरणरंगमल्लनृपतेर्वाचो जयंत्युज्ज्वला
दुर्बोधं यदतीव तद्विजहति स्पष्टार्थमित्युक्तिभिः स्पष्टा
र्थेष्वतिविस्तृतिं विदधति व्यर्थैः समासादिकैः अस्थाने
नुपयोगिभिश्च बहुभिर्जल्पैर्भ्रमं तन्वते श्रोतॄणामिति व
स्तुविप्लवकृतः सर्वेपि टीकाकृतः उत्सृज्य विस्तरमुद
स्य विकल्पजालं फल्गुप्रकाशमवधार्य च सम्यगर्थान् स
न्तः पतंजलिमते विवृतिर्मयेयमातन्यते बुधजनप्रतिबो
धहेतुः ॥ अथ योगानुशासनम् ॥ अनेन सूत्रेण शास्त्र
स्य संबंधाभिधेयप्रयोजनान्याख्यायंते अथ शब्दोधिका
रद्योतको मंगलार्थश्च युक्तियोगः यतः समाधौ समाधा
नमेकाग्रता अनुशिष्यते व्याख्यायते लक्षणभेदोपायफ
लैर्येन तदनुशासनम् ॥ योगस्यानुशासनं योगानुशास
नं तदाशास्त्रसमाप्तेरधिकृतं बोद्धव्यमित्यर्थः तत्र शास्त्र
स्य व्युत्पाद्यतया योगः ससाधनः सफलोगस्य कैवल्यफ
लं शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावलक्षण
संबंधः अभिधेयस्य योगस्य तत्फलस्य च समाधिसाधन
भावः संबंधः एतदुक्तं भवति व्युत्पादितस्य योगस्य साध
नानि शास्त्रेण प्रदर्श्यन्ते तत्साधनसिद्धो योगः कैवल्यफ
लमुत्पादयति इति तत्र को योगः इत्यत आह योगश्चित्त

वृत्तिनिरोधः चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या वृत्तयो-
ऽङ्गाङ्गिभावपरिणामरूपास्तासां निरोधो बहिर्मुखपरिणति-
विच्छेदादन्तर्मुखतया प्रतिलोमपरिणामेन स्वकारणे ल-
यो योग इत्याख्यायते स च निरोधः सर्वासां चित्तभूमीनां
सर्वप्राणिधर्मः कदाचित्कस्यांचित्तभावाविर्भवति ताश्च
क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तस्य भूमयः चित्तस्याव-
स्थाविशेषाः तत्र क्षिप्तं रजस उद्रेकादस्थिरं बहिर्मुखतया सुख-
दुःखादिविषयेषु विकल्पितेषु व्यवहितेषु सन्निहितेषु वा रजसा प्रे-
रितं तच्च सदैव दैत्यदानवादीनाम् मूढं तमस उद्रेकात्कृ-
त्याकृत्यविभागमन्तरेण क्रोधादिभिर्विरुद्धकृत्येष्वेव नियमितं
तच्च सदैव रक्षःपिशाचादीनाम् विक्षिप्तं तु सत्त्वोद्रेका-
द्वैशिष्ट्येन परिहृत्य दुःखसाधनं सुखसाधनेष्वेव शब्दादिषु प्रवृत्तं
तच्च सदैव देवानाम् एतदुक्तं भवति रजसा प्रवृत्तिरूपं तमसा प-
रापकारनियतं सत्त्वेन सुखमयं चित्तं भवति एतास्तिस्रश्चित्ता-
वस्थाः समाधावनुपयोगिन्यः एकाग्रनिरुद्धरूपे द्वे च सत्त्वोत्कर्षा-
द्यथोत्तरमवस्थितत्वात्समाधावुपयोगं भजेते सत्त्वादिक्रम-
व्युत्क्रमेण त्वयमभिप्रायः द्वयोरपि रजस्तमसोरत्यन्तहेयत्वे-
ऽपि तद्धेतुरजसः प्रथममुपादानं यावत्प्रवृत्तिर्दर्शिता तावत्
निवृत्तिर्नोपकल्पते इत्युपात्तमिति द्वयोर्व्यत्ययेन तमसः सत्त्व-
स्यान्ते दर्शितमुपादानात्तद्दर्शनम् एतस्यामेकाग्रतायां सम्प्रज्ञातयो-
गो भवतीति तत्रैकाग्रनिरुद्धयोर्यच्चित्त-
स्यैकाग्ररूपः परिणामः स योगः किमुक्तं भवति एकाग्रे बहि-
र्वृत्तिनिरोधः निरुद्धे च सर्वासां वृत्तीनां संस्काराणां च प्रवि-
लय इत्यनयोरेव भूम्योर्योगस्य सम्भवः इदानीं सूत्रकारो चित्तवृ-
त्तिनिरोधपदानि व्याख्यातुकामः प्रथमं चित्तपदस्याचष्टे
तदा द्रष्टुः स्वरूपेऽवस्थानं द्रष्टुः पुरुषस्य तस्मिन्काले स्वरूपे चि-
न्मात्रतायामवस्थानं स्थितिर्भवति अयमर्थः उत्पन्नविवेकख्या-
तेश्चित्तसम्बन्धाभावादभिमाननिवृत्तौ शान्तरूपपरिणा-
मात्पुरुषस्यात्मनः स्वरूपेणावस्थानं स्थितिर्भवतीति अन्यथा
तु द्रष्टा चेतनस्य किं स्वरूपमित्याह वृत्तिसारूप्यमितरत्र इतर-
त्र योगादन्यस्मिन्काले यच्चित्तस्य वृत्तयः शान्ताद्याकाराभिः सारूप्यं तद्रू-
पत्वम् अयमर्थः याः शान्तघोरमूढाः वृत्तयः आत्मिकाः

प्राप्तं भवति तदाहृत्य पदं सेव्यते व्यवहारिभिः प्रत्यक्षः तदेवं
यस्मिन्नेकाग्रतया परिणते विविक्तः स्वस्मिन् रूपे प्रतिष्ठितो भ
वति यस्मिंश्चेन्द्रियद्वारेण विषयाकारेण परिणते पुरुष-
स्तदाकार इव परिभाव्यते यथा जलतरङ्गेषु चलत्सु चन्द्रश्च-
लन्निव प्रतिभासते तन्निमित्तं वृत्तिपदमगताख्यातुमाह सं-
ख्याभिः वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः वृत्तयश्चित्तस्य परि-
णामविशेषः वृत्तिसमुदायरूपस्यावयविनः तावदवयवरू-
पत्वावयविनः एतद्रूपं भवति पञ्चवृत्तयः क्लेशरूपाः
क्लिष्टाः योगकालीनास्तद्विपरीताः अक्लिष्टाः ताः पञ्चवृत्त-
यः संक्षिप्याख्यातेय प्रमाणविपर्ययविकल्पनिद्रास्मृ-
तयः एतासां क्रमेण लक्षणमाह प्रत्यक्षानुमानागमाः प्र-
माणानि प्रत्यक्षमिति रत्नान्यमाणेनाशास्त्रकारेण भेद-
निरूपणीयावगन्तव्यानि लक्षणमन्त्रकृतम् प्रमा-
णम् प्रमाणलक्षणेन प्रतिपादितेन प्रमाणानाम् इन्द्रिय-
द्वारेण बाह्यवस्तूपरागाच्चित्तस्य तद्विषया सामान्यवि-
शेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षम्
गृहीतसम्बन्धाल्लिङ्गाल्लिङ्गिनि सामान्यात्मना योऽध्यवसायोऽनु-
मानं आप्तवचनमागमः एवं प्रमाणत्रयरूपां वृत्तिमाख्याय विपर्य-
यरूपामाह ॥ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥
अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः यथा शुक्ति-
कायां रजतज्ञानम् अतद्रूपप्रतिष्ठमिति तस्यार्थस्य यद्-
रूपं न तस्मिन् रूपे प्रतितिष्ठति तस्यार्थस्य प्रतिभासकत्वेन
शयः यत्पारमार्थिकं ज्ञानं विपर्ययः भासयतीति यावत्
संशयोऽप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानम् यथा स्थाणुर्वा
पुरुषो वेति ॥ विकल्पवृत्तिमाह शब्दज्ञानानुपाती वस्तु-
शून्यो विकल्पः शब्दजनितं ज्ञानं शब्दज्ञानं तदनुपतितुं शी-
लं यस्य स शब्दज्ञानानुपाती वस्तुनस्तथात्वमनपेक्षमाणो-
ऽध्यवसायः स विकल्प इत्युच्यते यथा पुरुषस्य चैतन्यं स्व-
रूपमित्यत्र देवदत्तस्य कम्बलः इति शब्दजनिते ज्ञाने षष्ठ्या यो-
ऽभिहितो भेदस्तमिहाविद्यमानमपि समारोप्याध्यवसाय-
वर्तनं चैतन्यमेव पुरुषः ॥ निद्रां व्याख्यातुमाह अभाव-
प्रत्ययालम्बना वृत्तिर्निद्रा अभावप्रत्ययालम्बनेत्यस्या

वृत्तेः स्वाप इत्युक्ता एतच्चैकाग्र्ये भवति यावत्तेन समुद्रेकत्वात्तेष
सः समस्तविषयपरित्यागेन प्रवर्तते इत्यतः सा निद्रा अस्याश्च
सुखमहमस्वाप्समिति स्मृतिदर्शनात् स्मृतेश्चानुभवव्यति
रेकानुपपत्तेर्वृत्तित्वम् ॥ स्मृतिं व्याख्यातुमाह अनुभूतवि
षयासंप्रमोषः स्मृतिः प्रमाणेनानुभूतस्य विषयस्य योयमसंप्रमोषः
संस्कारद्वारेण बुद्धावुपारोहः सा स्मृतिः तत्र प्रमाणविपर्
ययविकल्पा जाग्रदवस्था त एव यदानुभवबलात्प्रतीयमा
नाः स्वप्नः निद्रा त्वसंवेद्यमानविषया स्मृतिस्तु प्रमा
णविपर्ययविकल्पनिद्रानिमित्ता एवं वृत्तीर्व्याख्याय सो
पायं निरोधं व्याख्यातुमाह अभ्यासवैराग्याभ्यां तन्निरोधः
अभ्यासवैराग्ये वक्ष्यमाणलक्षणे ताभ्यां प्रकाशप्रवृत्तिनि
यमरूपाणां वृत्तीनां यो निरुध्यमानो निरोधः किमुक्तं
भवति तासां विनिवृत्तबाह्याभिनिवेशानामन्तर्मुखतया
स्वकारण एव चित्ते शक्तिरूपतयावस्थानम् तत्र विषयदो
षदर्शनजेन वैराग्येण तद्वैमुख्यमुत्पाद्यते अभ्यासेन च सुख
जनकशान्तप्रवाहप्रदर्शनद्वारेण दृढस्थैर्यमुत्पाद्यते ॥
इत्थं ताभ्यां भवति वृत्तीनां निरोधः अभ्यासं व्याख्यातुमाह
तत्र स्थितौ यत्नोऽभ्यासः वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः
परिणामः स्थितिः तस्यां यत्नः पुनः पुनस्तथात्वेन
चेतसि निवेशनमभ्यास इत्युच्यते तस्यैव विशेषमा
ह स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः बहु
कालं नैरन्तर्येणादरातिशयेन च सेव्यमानो दृढभूमिः स्थि
रो भवति दार्ढ्याय प्रभवतीत्यर्थः वैराग्यस्य लक्षणमाह
दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्
द्विविधो विषयो दृष्ट आनुश्रविकश्च दृष्ट इहैवोपलभ्यमान
शब्दादिः देवलोकादावानुश्रविकः अनुश्रूयते गुरुमुखा
दित्यनुश्रवो वेदः ततः आगतः आनुश्रविकः तयोर्द्व
योरपि विषययोः परिणामविरसत्वदर्शनाद्विगतगर्ध
स्य या वशीकारसंज्ञा ममैते वश्या नाहमेतेषां वश्य इति
योयं विमर्शस्तद्वैराग्यमुच्यते तस्यैव विशेषमाह तत्परं पु
रुषख्यातेर्गुणवैतृष्ण्यम् तद्वैराग्यं परमुत्कृष्टं कीदृशं यं
न गुणविषयं प्रथमं वैराग्यं विषयविषयं इदं तु गुण

पा॰ ता॰ १

रुषविवेकख्यातेरेव भवति निरोधसमाधेरत्यन्तानुकूल
त्वात् एवं योगस्य स्वरूपमुक्त्वा संप्रज्ञातासंप्रज्ञातभेदमाह
वितर्कविचारानन्दास्मितानुगमात्संप्रज्ञातः समाधिरिति
शेषः सम्यक्संशयविपर्ययरहितत्वेन प्रज्ञायते प्रकर्षे
ण ज्ञायते भाव्यस्य स्वरूपं येन स संप्रज्ञातः समाधिर्भावना
विशेषः स वितर्कादिभेदाच्चतुर्भेदः सवितर्कः सविचारः
सानन्दः सास्मितश्च भावना भाव्यस्य विषयान्तरपरिहारे
ण चेतसि पुनः पुनर्निवेशनम् भाव्यं च द्विधा ईश्वरस्त
त्त्वानि च तान्यपि च द्विविधानि जडाजडभेदात् जडानि च
तुर्विंशतिः अजडः पुरुषः तत्र यदा महाभूतेन्द्रियाणि स्थू
लानि भावना विषयत्वेनादाय पूर्वापरानुसन्धानेन शब्दा
र्थोल्लेखभेदेन च भावना प्रवर्तते तदा सवितर्कः समाधिः
अस्मिन्नेवालम्बने पूर्वापरानुसन्धानशब्दार्थोल्लेखशून्य
त्वेन यदा भावना प्रवर्तते तदा निर्वितर्कः तन्मात्रान्तःक
रणलक्षणं सूक्ष्मं विषयमालम्ब्य तस्य देशकालधर्मावच्छे
देन यदा भावना प्रवर्तते तदा सविचारः तस्मिन्नेवालम्बने
देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन भावना
क्रियमाणा निर्विचार इत्युच्यते एवंपर्यन्तः समाधिर्ग्राह्यस
मापत्तिरित्युच्यते यदा तु रजस्तमोलेशानुविद्ध
मन्तःकरणसत्त्वं भाव्यते तदा गुणभावाच्चितिशक्तेः सुखप्र
काशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात्सानन्दः स
माधिर्भवति अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वान्तरं प्रधा
नपुरुषरूपं न पश्यन्ति ते विगतदेहाहङ्कारत्वाद्विदेहशब्द
वाच्याः इयं ग्रहणसमापत्तिः ततः परं रजस्तमोलेशानभि
भूतं शुद्धसत्त्वमालम्बनीकृत्य या प्रवर्तते भावना तस्यां ग्रा
ह्यस्य सत्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात्सत्तामात्रावशे
षत्वेन समाधिः सास्मित इत्युच्यते न चाहङ्कारास्मितयो
रभेदः शङ्कनीयः यतो यत्रान्तःकरणमहमित्युल्लेखेन वि
षयान्वेदयते सोऽहङ्कारः यत्रान्तर्मुखतया प्रतिलोमपरि
णामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता
अस्मिन्नेव समाधौ ये कृतपरितोषाः परं परमात्मानं पुरुषं
न पश्यन्ति तेषां चेतसि स्वकारणे लयमुपागते प्रकृतिल

यारुच्यते येपरंपुरुषंज्ञात्वाभावनायांप्रवर्तन्ते तेषामियंविवेक
ख्यातिर्गृहीतसमापत्तिरित्युच्यते तत्रसवितर्कसमाधौचतस्रो
ऽवस्थाः शक्तिरूपतयातिष्ठन्ते तत्रैकैकस्यास्त्यागउत्तरइति
चतुरवस्थोयंसंप्रज्ञातः समाधिः असंप्रज्ञातमाह विरामप्र
त्ययाभ्यासपूर्वः असंप्रज्ञातमा विरम्यतेनेनेति विरामः वित
र्कादिचिन्तात्यागः विरामश्चासौप्रत्ययश्च विरामप्रत्ययः तस्या
भ्यासः पुनः पुनश्चेतसि निवेशनं तत्रयाकाचिद्वृत्तिरु
ल्लसति तस्यानेतिनेतीतिनैरन्तर्येणपर्युदसनंतत्पूर्वकोसंप्र
ज्ञातः समाधिः संस्कारशेषोन्यः तद्विलक्षणः असंप्रज्ञातश्
ब्दार्थः नतत्रकिंचिद्वेद्यंसंप्रज्ञायतेऽस्यसंप्रज्ञातोनिर्बीजः समा
धिः इहचतुर्विधश्चित्तपरिणामः व्युत्थानंसमाधिप्रारम्भएका
ग्रतानिरोधश्च तत्रक्षिप्तमूढेचित्तभूमीव्युत्थानंविक्षिप्तभूमिः
सत्वोद्रेकात्समाधिप्रारम्भः एकाग्रतानिरोधेनपर्यन्तभूमी
प्रतिपरिणामंचसंस्काराः तत्रव्युत्थानजनिताः संस्काराः समा
धिप्रारम्भजैः संस्कारैर्हन्यन्ते तज्जाश्चैकाग्रताजैर्निरोधजनितै
रेकाग्रताजाताः संस्काराः स्वरूपंचहन्यन्ते यथासुवर्णसंवलि
तंध्मायमानंसीसकमात्मानंसुवर्णमलंचनिर्दहति एवमे
काग्रताजनितान्संस्कारान्निरोधजाः स्वात्मानंचनिर्दहन्ति त
त्रदेवंयोगस्यस्वरूपंभेदंसंक्षेपेणोपायंचाभिधायविस्तरेण
पायंयोगाभ्यासप्रदर्शनपूर्वकंवक्तुमुपक्रमते भवप्रत्ययो
विदेहप्रकृतिलयानाम् विदेहाः प्रकृतिलयाश्चवितर्कादि
भूमिकासूत्रेव्याख्याताः तेषांसमाधिः भवप्रत्ययः भवः संसारः
सएवप्रत्ययः कारणंयस्यसभवप्रत्ययः अयमर्थः ॥ आवि
र्भूतमात्रएवसंसारेतेतथाविधसमाधिभाजोभवन्ति ते
षांपरतत्वादर्शनाद्योगाभासोयम् अतः परतत्वज्ञानेतद्भाव
नायांचमुक्तिकामेनयत्नोविधेयइत्येतदर्थमुपदिष्टम् ॥
नदन्येषांत ॥ श्रद्धावीर्यस्मृति समाधिप्रज्ञापूर्वकइतरेषां
विदेहप्रकृतिलयव्यतिरिक्तानांयोगिनांश्रद्धादिपूर्वकउपाया
प्रत्ययपूर्वकः तेचश्रद्धादयः क्रमादुपायोपेयभावेनप्रव
र्तमानाः संप्रज्ञातस्यसमाधेरुपायतांप्रतिपद्यन्ते तत्रश्र
द्धायोगविषयेचेतसः प्रसादः वीर्यमुत्साहः स्मृतिरनुभूता
संप्रमोषः समाधिरेकाग्रता प्रज्ञाज्ञातव्यविवेकः तत्र

पा॰ द्धावतो वीर्यं जायते योगविषये उत्साहवान् सोत्साहस्य पा
ता॰ श्चात्यासु योगभूमिषु स्मृतिरुत्पद्यते तत्स्मरणाच्चेतः समा
५ धीयते समाहितचित्तश्च भाव्यं सम्यग्विजानाति त एते संप्रज्ञा
तसमाधेरुपायाः तस्याभ्यासात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः
उक्तोपायवतां योगिनामुपायभेदानाह तीव्रसंवेगानामास
न्नः समाधिलाभः संवेगः क्रियाहेतुर्दृढतरः संस्कारः स ती
व्रो येषामधिमात्रोपायानां तेषामासन्नः समाधिलाभः समा
धिफलं चासन्नं भवति शीघ्रमेव निष्पद्यत इत्यर्थः ॥ के ते ती
व्रसंवेगा इत्यत आह मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः
तेभ्य उपायेभ्यो मृद्वादिभेदभिन्नेभ्य उपायवतां विशेषो भव
ति मृदुमध्याधिमात्रत्वादुपायभेदाः तेषां प्रत्येकं मृदुसंवेग
मध्यसंवेगतीव्रसंवेगभेदात्त्रिविधाः तद्भेदेन नव योगिनो भ
वन्ति मृदूपायो मृदुसंवेगः मध्यसंवेगः तीव्रसंवेगश्च मध्यो
पायो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्च अधिमात्रोपा
यो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्च तीव्रसंवेगे महाय
त्नः कार्यः ॥ इत्यभेदोपदेशाः ॥ इदानीमेतद्विलक्षणं सु
गममुपायान्तरमाह ईश्वरप्रणिधानाद्वा ॥ ईश्वरो वक्ष्यमा
णलक्षणः प्रणिधानं तत्र भक्तिविशेषः विषयसुखादि
कं फलमनिच्छन्सर्वाः क्रियास्तस्मिन्परमगुरावर्पयति तत्प्रणिधा
नं समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः ईश्वरस्य प्रणि
धानात्समाधिलाभ इत्युक्तम् तत्रेश्वरस्य स्वरूपं प्रमाणं प्रभा
वं वाचकमुपासनाक्रमं तत्फलं च क्रमाद्वक्तुमाह क्लेश
कर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः क्ले
शा इति क्लेशाः अविद्यादयो वक्ष्यमाणाः विहितप्रतिषि
द्धव्यामिश्ररूपाणि कर्माणि विपच्यन्त इति विपाकाः क
र्मफलानि जात्यायुर्भोगाः आफलविपाकाच्चित्तभूमौ शे
रत इत्याशया वासनाख्याः संस्कारास्तैरपरामृष्टस्त्रिष्वपि
कालेष्वसंस्पृष्टः पुरुषः अन्येभ्यः पुरुषेभ्यो विशिष्यत इति
विशेषः ईश्वरः ईशनशील इच्छामात्रेण जगदुद्धरणक्षमः
यद्यपि सर्वेषामात्मनां क्लेशादिस्पर्शो नास्ति तथापि चित्तग
तेसंबन्धाद्व्यपदिश्यते यथा योद्धृगतौ जयपराजयौ स्वामिनः
अस्य तु त्रिष्वपि कालेषु तथाविधोऽपि क्लेशादिपरामर्शो ना॰

ति अतः स विलक्षण एव भगवानीश्वरः तस्य च तथाविधमै-
श्वर्यमनादेः सत्वोत्कर्षात् सत्वोत्कर्षश्चास्य प्रकृष्टज्ञाना-
देव न चानयोर्ज्ञानैश्वर्ययोरितरेतराश्रयत्वम् परस्परानपे-
क्षत्वात्ते ज्ञानैश्वर्ये ईश्वरसत्वे वर्तमाने अनादिभूते तेन च तथा-
विधेन सत्वेन तस्यानादिरेव संबन्धः प्रकृतिपुरुषसंयोगवि-
योगयोरीश्वरेच्छाव्यतिरेकेणानुपपत्तेः यथेतरेषां प्राणि-
नां सुखदुःखमोहतया परिणते चित्ते निर्मले सात्विकधर्मा-
त्मप्रख्ये प्रतिसंक्रान्ता चिच्छाया संक्रान्तेः संवेद्या भवति नैव-
मीश्वरस्य तस्य केवल एव सात्विकः परिणाम उत्कर्षवा-
ननादिसंबन्धेन भोग्यतया व्यवस्थितः अतः पुरुषान्तरविल-
क्षणतया स एवेश्वरः मुक्तात्मनां पुनः क्लेशादियोगस्तैस्तै-
श्शास्त्रोक्तैरुपायैर्निवर्तितः अस्य पुनः सर्वदैव तथात्वान्न
मुक्तात्मतुल्यत्वम् न चेश्वराणामनेकत्वं तेषां तुल्यत्वे भिन्ना-
भिप्रायत्वात्कार्यस्यैवानुपपत्तिः उत्कर्षापकर्षत्वे न य एव
उत्कृष्टः स एवेश्वरः तस्यैव काष्ठाप्राप्तत्वादैश्वर्यस्य एवमी-
श्वरस्य स्वरूपमभिधाय प्रमाणमाह तत्र निरतिशयं सर्वज्ञबी-
जम् तस्मिन्भगवति सर्वज्ञत्वस्य यद्बीजं अतीतानागतादि-
ग्रहणस्याल्पत्वं महत्वं च मूलत्वाद्बीजमिव बीजम् तत्र नि-
रतिशयं काष्ठाप्राप्तं दृष्टा ह्यल्पत्वमहत्वादीनां धर्मादीनां
सातिशयानां काष्ठाप्राप्तिः यथा परमाणावल्पत्वस्याका-
शे परममहत्वस्य एवं ज्ञानादयोपि चित्तधर्मास्तारतम्येन
परिदृश्यमानाः क्वचिन्निरतिशयतामासादयन्ति यत्रैते निर-
तिशयाः स ईश्वरः यद्यपि सामान्यमात्रेनुमानस्य पर्यवसि-
तत्वान्न विशेषावगतिः संभवति तथापि शास्त्रादस्य सर्वज्ञ-
त्वादयो विशेषाः अवगन्तव्याः तस्य स्वप्रयोजनाभावे कथं प्र-
कृतिपुरुषयोः संयोगवियोगावापादयतीति नाशंकनीयं
संयोगवियोजनाभावे तस्य कारुणिकत्वाद्भूतानुग्रह एव
प्रयोजनं कल्पप्रलयमहाप्रलयेषु निःशेषान्संसारिण उ-
द्धरिष्यामीति तस्याध्यवसायः यद्यस्येष्टं तत्तस्य प्रयोजनम्
एवमीश्वरस्य प्रमाणमभिधाय प्रभावमाह स पूर्वेषामपि गु-
रुः कालेनानवच्छेदात् आद्यानां स्रष्टॄणां ब्रह्मादीनामपि गु-
रुरुपदेष्टा यतः स कालेन नावच्छिद्यते अनादित्वात् तेषां

पा॰
रा॰
५

पुनरादिमत्वादस्ति कालेनावच्छेदः। एवं प्रभावमीश्वरमभिधाय
योपासनाय वाचकमाह। तस्य वाचकः प्रणवः॥ इत्थमुक्तस्वरूपस्ये
श्वरस्य वाचकोऽभिधायकः प्रणवः ओंकारः। तयोश्च वाच्यवा
चकभावः संबन्धो नित्यः संकेतेन प्रकाश्यते न तु केनचि
त्क्रियते। यथा पितापुत्रयोर्विद्यमानः संबन्ध एवास्यायं पिता
स्यायं पुत्र इति केनापि प्रकाश्यते॥ उपासनमाह। तज्जपस्त
दर्थभावनम्॥ तस्य सार्धत्रिमात्रप्रणवस्य जपो यथावदुच्चारण
न तदर्थस्य चेश्वरस्य भावनं पुनः पुनश्चेतसि निवेशनम्॥
एकाग्रताया उपाय इत्युक्तं भवति। उपासनायाः फलमा
ह। ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च॥ तस्माज्जपात्त
दर्थभावनाच्च योगिनः प्रत्यक्चेतनाधिगमो भवति। विषयप्रति
कूल्येन स्वान्तःकरणाभिमुखमञ्चति या चेतना दृक्शक्तिः सा
चेतना तस्या अधिगमो ज्ञानं भवति। अन्तरायाश्च वक्ष्यमाणास्तेषा
मभावः शक्तिप्रतिबन्धो भवति॥ अथ के तेऽन्तराया इत्यपे
क्षायामाह। व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्श
नालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः॥
नवैते रजस्तमोबलात्प्रवर्तमानाश्चित्तस्य विक्षेपा भवन्ति। तै
रेकाग्रताविरोधिभिश्चित्तं विक्षिप्यत इत्यर्थः। तत्र व्याधि
र्धातुवैषम्यनिमित्तो ज्वरादिः। स्त्यानमकर्मण्यता चित्तस्य
उभयकोट्यवलम्बनं विज्ञानं संशयः योगः साध्यो न वा
प्रमादोऽनवधानतानुष्ठानशीलता समाधिसाधनेष्वौदा
सीन्यम्। आलस्यं चित्तकाययोर्गुरुत्वम् योगविषये प्रवृ
त्त्यभावहेतुः। अविरतिश्चित्तस्य विषयसंप्रयोगात्मा गर्धः॥
भ्रान्तिदर्शनं शुक्तिकायां रजतवद्विपर्ययज्ञानम्। अलब्धभू
मिकत्वं कुतश्चिन्निमित्तात्समाधिभूमेरलाभः असंप्राप्तिः॥
अनवस्थितत्वं लब्धायामपि समाधिभूमौ चित्तस्य तत्राप्र
तिष्ठा। एते समाधेरेकाग्रताया यथायोगं प्रतिपक्षत्वादन्त
राया इत्युच्यन्ते। चित्तविक्षेपकारकानन्यानप्यन्तरायान्प्रति
पादयति। दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेप
सहभुवः॥ कुतश्चिन्निमित्तादुत्पन्नेषु विक्षेपेषु एते दुःखाद
यः प्रवर्तन्ते। तत्र दुःखं चित्तस्य राजसः परिणामो बाधनाल
क्षणो यद्बाधात्प्राणिनस्तदुपघाताय प्रवर्तन्ते। दौर्मनस्यं बाह्या

यन्ते तैः करणैर्मानसो दोषः अङ्गमेजयत्वं सर्वाङ्गीणो वेपथुः आ
सनमनःस्थैर्यस्य बाधकः प्राणो यद्बाह्यं वायुमाचामति स
श्वासः यत्कौष्ठ्यं वायुं निःश्वसिति स प्रश्वासः एते विक्षेपैः स
ह प्रवर्तमाना यथोदिताभ्यासवैराग्याभ्यां निरोद्धव्या इत्ये
षामुपदेशः सोपद्रवविक्षेपप्रतिषेधार्थमुपायान्तरमाह
तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः तेषां विक्षेपाणां निषेधा
र्थमेकस्मिन् कस्मिंश्चिदभिमते तत्त्वेऽभ्यासश्चेतसः पुनः पुनर्निवे
शनं कुर्यात् यद्बलात् प्रत्युदितायामेकाग्रतायां विक्षेपाः
प्रशममुपयान्ति इदानीं चित्तसंस्कारापादकं परिकर्म कथयन्
नुपायान्तरमाह मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपु
ण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् मैत्री सौह
र्दात् करुणा कृपा मुदिता हर्षः उपेक्षा औदासीन्यम् एता यथा
क्रमं सुखितेषु दुःखितेषु पुण्यवत्सु अपुण्यवत्सु च भावयेत्
तथा हि सुखितेषु साध्वेषां सुखित्वमिति मैत्रीं कुर्यात् न तु ई
र्ष्याम् दुःखितेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति कृ
पामेव कुर्यात् न तु किमेतेनापुण्येन इति वैषम्यम् अपुण्य
वत्स्वौदासीन्यमेव भावयेन्नानुमोदनम् न च द्वेषम् सूत्रे सु
खदुःखादिशब्दैस्तद्वन्तः प्रतिपादिताः तदेवं मैत्र्यादिपरि
कर्मणा चित्तं प्रसीदति सुखेन समाधेराविर्भावो भवति परि
कर्म चैतद्बाह्यं कर्म यथा गणिते मिश्रकादिव्यवहारगणि
ते मिश्रकादिसंकलितादिकर्मोपकारकत्वेन प्रधानकर्म
निष्पत्तये प्रभवति एवं द्वेषरागादिप्रतिपक्षभूतमैत्र्यादिभा
वनया समुत्पादितप्रसादं चित्तं संप्रज्ञातादिसमाधियोग्यं
सम्पद्यते रागद्वेषावेव मुख्यतया विक्षेपमुत्पादयतः तौ
चेत्समूलमुन्मूलितौ स्यातां तदा प्रसन्नत्वान्मनसो भवत्येवैक
ग्रता उपायान्तरमाह प्रच्छर्दनविधारणाभ्यां वा प्राणस्य प्र
च्छर्दनं कौष्ठ्यस्य वायोः प्रयत्नविशेषान्मात्राप्रमाणेन बहि
र्निःसारणं विधारणं मात्राप्रमाणेनैव प्राणस्यास्य गति
विच्छेदः स च द्वाभ्यां प्रकाराभ्यां बाह्याभ्यन्तरपूरणेन पूरि
तस्य वा तत्रैव निरोधेन तदेवं रेचकपूरककुम्भकभेदेन
त्रिविधः प्राणायामः चित्तस्य स्थितिमेकाग्रतायां निब
ध्नाति सर्वासामिन्द्रियवृत्तीनां प्राणवृत्तिपूर्वकत्वात् मनः

पा॰
ता॰
९

प्राणयोश्च स्वस्वव्यापारे परस्परमेकयोगक्षेमत्वात् जीयमानः प्रा
णः समस्तेन्द्रियवृत्तिनिरोधद्वारेण चित्तस्यैकाग्रतायां प्रभव
ति समस्तदोषक्षयहेतुत्वं चास्यागमे श्रूयते दोषकृताश्च सर्वा वि
क्षेपवृत्तयः अतो दोषनिर्हरणद्वारेणाप्यस्यैकाग्रतायां सामर्थ्यं
इदानीमुपायान्तरप्रदर्शनोपक्षेपेण सम्प्रज्ञातस्य समाधेः पूर्वाङ्गं क
रोति विषयवती वा प्रवृत्तिरुत्पन्ना स्थितिनिबन्धने मनस इति·
वाक्यशेषः विषया गन्धरसरूपस्पर्शशब्दास्ते विद्यन्ते फलत्वेन य
स्याः सा विषयवती प्रवृत्तिर्मनसः स्थैर्यं करोति तथाहि नासा
ग्रे चित्तं धारयतो दिव्यगन्धसंविदुपजायते तादृश्येव जिह्वाग्रे
रससंवित् तालुनि रूपसंवित् तदेवं तत्तदिन्द्रियद्वारेण तस्मि
न्स्तस्मिन् दिव्ये विषये जायमाना संवित् चित्तस्यैकाग्रताहेतुर्भव
ति अस्ति योगस्य फलमिति योगिनः समाश्वासोत्पादनात् एवंवि
धमेवोपायान्तरमाह विशोका वा ज्योतिष्मती प्रवृत्तिरुत्पन्ना चि·
त्तस्य स्थितिनिबन्धनीति वाक्यशेषः ज्योतिःशब्देन सात्त्विकः प्रका
श उच्यते सः प्रशस्तो भूयानतिशयवांश्च विद्यते यस्याः सा ज्योतिष्म
ती प्रवृत्तिः विशोका विगतः सुखमयसत्त्वाभ्यासवशाच्छोको
रजःपरिणामो यस्याः सा विशोका चेतसः स्थितिनिबन्धने अय·
मर्थः हृत्पद्मसम्पुटमध्ये प्रशान्तकल्लोलक्षीरोदधिप्रख्यं चित्त·
सत्त्वं भावयतः प्रज्ञालोकात् सर्ववृत्तिपरिक्षये चेतसः स्थैर्यमुत्प·
द्यते उपायप्रदर्शनद्वारेण सम्प्रज्ञातस्य समाधेर्विषयं दर्शयति
वीतरागविषयं वा चित्तम् मनसः स्थितिनिबन्धनं भवतीति·
वाक्यशेषः वीतविषयरागः परित्यक्तविषयाभिलाषः तस्य
चित्तं परिहृतक्लेशं तदालम्बनीकृतं चेतसः स्थितिहेतुर्भवति ॥
एवंविधमेवोपायान्तरमाह स्वप्ननिद्राज्ञानालम्बनं वा प्रत्यस्त
मितबाह्येन्द्रियवृत्तेर्मनोमात्रेणैव यत्र भोक्तृत्वमात्मनः स स्व
प्नः निद्रा पूर्वोक्तलक्षणा तदालम्बनं स्वप्नालम्बनं निद्रालम्बनं·
वा ज्ञानमालम्ब्यमानं चेतसः स्थितिं करोति नानारुचित्वात्प्राणि
नः यस्मिन्कस्मिंश्चिद्वस्तुनि योगिनः श्रद्धा भवति तस्य ध्यानेना
पि भवतीष्टसिद्धिरिति प्रतिपादयितुमाह यथाभिमतध्याना
द्वा यथाभिमते वस्तुनि बाह्ये चन्द्रादावाभ्यन्तरे नाडीचक्रादौ वा·
भाव्यमाने चेतः स्थिरीभवति एवमुपायान्प्रदर्श्य फलदर्शना
र्थमाह परमाणुपरममहत्त्वान्तोऽस्य वशीकारः एभिरुपायैश्चि

न्तेष्वेषं भावयतो योगिनः सूक्ष्मविषयभावनाद्वारेण परमाण्वं-
तो वशीकारः अप्रतीघातरूपो जायते कविन्त्यपमाणपर्यन्ते स्थूले
ष्वमतो न प्रतिहन्यत इत्यर्थः एवं स्थूलमाकाशापरममहत्त्वपर्यं-
न्ते भावयतो न क्विचिश्चेतसः प्रतिघात उत्पद्यते सर्वत्र स्वातन्त्र्यं भव-
तीत्यर्थः एवमेभिरुपायैः संस्कृतस्य चेतसः कीदृशं रूपं भवती-
त्याह क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थत-
दञ्जनता समापत्तिः क्षीणा वृत्तयो यस्य तत्क्षीणवृत्ति तस्य ग्रहीतृ-
ग्रहणग्राह्येष्वात्मेन्द्रियविषयेषु तत्स्थतदञ्जनता समापत्ति-
र्भवति तत्स्थता तदेकाग्रता तदञ्जनता समापन्नत्वम् न्यग्भूते चित्ते वि-
षयस्य भाव्यमानस्यैवोत्कर्षस्तथाविधा समापत्तिस्तद्रूपपरिणा-
मो भवतीत्यर्थः दृष्टान्तमाह अभिजातस्य मणेरिवेति यथाभिजातस्य
निर्मलस्फटिकमणेस्तत्तदुपाश्रयवशात्तत्तद्रूपापत्तिरेवं नि-
र्मलचित्तसत्त्वस्य तत्तद्भावनीयवस्तूपरागात्तद्रूपापत्तिः
यद्यपि ग्रहीतृग्रहणग्राह्येष्वित्युक्तम् तथापि भूमिकाक्रमव-
शाद्ग्राह्यग्रहणग्रहीतृष्विति द्रष्टव्यम् यतः प्रथमं ग्राह्यनिष्ठः समाप-
त्ततो ग्रहणनिष्ठः ततोऽस्मितामात्ररूपो ग्रहीतृनिष्ठः केवलस्य
पुरुषस्य ग्रहीतुर्भाव्यत्वासम्भवात् ततश्च स्थूलसूक्ष्मग्राह्योप-
रक्ते चित्ते तत्र समापत्तिर्भवति एवं ग्रहणे ग्रहीतरि च समापत्ति-
र्बोद्धव्या इदानीमुक्ताया एव समापत्तेश्चतुर्विधं भेदमाह शा-
ब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का श्रोत्रेन्द्रियग्राह्यः शा-
ब्दः स्फोटो वा शब्दः अर्थो जात्यादिः ज्ञानं सत्त्वप्रधाना बुद्धिवृत्तिः
विकल्प उक्तलक्षणः तैः संकीर्णा परस्पराध्यासेन यत्र शब्दादयः प-
रस्पराध्यासेन विकल्परूपेण प्रतिभासन्ते गौरिति शब्दो गौरि-
त्यर्थो गौरिति ज्ञानमित्यनेनाकारेण सा सवितर्का समापत्तिरु-
च्यते उक्तलक्षणविपरीता निर्वितर्काभासा निर्वितर्का शब्दा-
र्थस्मृतिप्रलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भू-
तज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः भेदान्त-
रं प्रतिपादयितुमाह एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता
एतयैव सवितर्कया निर्वितर्कया च समापत्त्या सविचारा निर्विचारा च व्या-
ख्याता कीदृशी सूक्ष्मविषया सूक्ष्मं तन्मात्रान्तःकरणादि विषयो
यस्याः सा तथोक्ता एतेन पूर्वस्याः स्थूलविषयत्वं प्रतिपादितं
भवति सा हि महाभूतालम्बना शब्दार्थविकल्पत्वेन देशका-

पा॰ ला॰ सू॰

लयधर्मावच्छिन्नः सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा सविचारा देशकाल
धर्मरहितो धर्ममात्रतया सूक्ष्मोऽर्थः तन्मात्रेन्द्रियरूपः प्रतिभा-
ति यस्यां सा निर्विचारा अस्या एव सूक्ष्मविषयायाः किंपर्यन्तः सूक्ष्म
विषय इत्याह सूक्ष्मविषयत्वं चालिंगपर्यवसानम् सविचारनिर्विचा
रयोः समापत्त्योर्यत्सूक्ष्मविषयत्वमुक्तं तदलिंगपर्यवसानम् न क्वचि
ल्लीयते न वा किंचिल्लिंगयति गमयतीत्यलिंगं प्रधानम् तत्पर्यन्तं सूक्ष्म
विषयत्वं तथा हि गुणानां परिणामे चत्वारि पर्वाणि विशिष्टलिंगमवि
शिष्टलिंगं भूतानि अविशिष्टलिंगं तन्मात्रेन्द्रियाणि लिंगमात्रं बुद्धिरलिंगं प्र
धानमिति नातः परं सूक्ष्ममस्तीत्युक्तं भवति ॥ एतासां समापत्तीनामुक्
ते प्रयोजनमाह ता एव सबीजः समाधिः ताः पूर्वोक्तलक्षणाः समा
पत्तयः सह बीजेनालम्बनेन सह वर्तन्त इति सबीजः संप्रज्ञातः समाधि
रित्युक्ते सर्वासां सालम्बनत्वात् अतीतरासां समापत्तीनां निर्विचारफल
त्वात् निर्विचारायाः फलमाह निर्विचारवैशारद्येऽध्यात्मप्रसादः निर्विचा
रत्वं व्याख्यातम् वैशद्यं नैर्मल्यं सवितर्कां स्थूलविषयामपेक्ष्य निर्वितर्कायाः
प्राधान्यम् ततोऽपि सूक्ष्मविषयायाः सविचारायाः ततो निर्विकल्परूपा
या निर्विचारायाः तस्यास्तु निर्विचारायाः प्रकृष्टः समवशाद्वैशद्ये नैर्मल्ये
सत्यध्यात्मप्रसादः समुपजायते चित्तं क्लेशवासनारहितं स्थितं स्थिर
प्रवाहयोग्यं भवति एतदेव चित्तस्य वैशद्यं यत्स्थितौ दार्ढ्यं ऋतं सत्यमेव
बिभर्तीति कदाचिदपि विपर्ययेणाच्छाद्यते सा ऋतंभरा प्रज्ञा तस्मिन्सति
किं भवतीत्याह ऋतंभरा तत्र प्रज्ञा तस्मिन्सति भवतीत्यर्थः तस्माच्च प्रज्ञालो
कात्सर्वं यथावत्पश्यन्योगी प्रकृष्टं योगं प्राप्नोति ॥ अस्याश्च प्रज्ञान्तराद्वै
लक्षण्यमाह श्रुतमागमज्ञानं अनुमानमुक्तलक्षणं ताभ्यां या जाय
ते प्रज्ञा सा सामान्यविषया न हि शब्दलिंगयोर्विशेषप्रतिपत्तौ सामर्थ्य
म् इयं पुनर्निर्विचारवैशारद्यसमुद्भवा प्रज्ञा ताभ्यां विलक्षणा विशेषविषया
त्वात् अस्यां हि प्रज्ञायां सूक्ष्मव्यवहितविप्रकृष्टानामपि विशेषः स्फुटेनैव रू
पेणाभासते अतस्तस्यामेव योगिना परः प्रयत्नः कर्तव्य इत्युपदिष्टं
भवति अस्याः प्रज्ञायाः फलमाह तया प्रज्ञया यो जनितः संस्कारः सो
ऽन्यान्व्युत्थानजान्समाधिजांश्च संस्कारान्प्रतिबध्नाति स्वकार्यकरणा
क्षमान्करोतीत्यर्थः अतस्तत्त्वरूपतया जनितः संस्कारो बलवत्त्वादत
त्त्वरूपप्रज्ञाजनितान्संस्कारान्बाधितुं शक्नोति अतस्तामेव प्रज्ञामभ्
भ्यसेदित्युक्तं भवति एवं संप्रज्ञातं समाधिमभिधायासंप्रज्ञातमाह
निर्बीजसमाधिः तस्य संप्रज्ञातस्यापि निरोधे विलये सति सर्वासां चित्त

वृत्तीनां स्वकारणे प्रविलयाद्यायासंस्कारमात्राद्वृत्तिरुदेति तस्यां
तस्यां नेति नेति केवलं पर्युदसनान्निर्बीजस्समाधिर्भवति यस्मिन्सति
पुरुषस्स्वरूपनिष्ठः शुद्धो भवति तदत्राधिकृतस्य योगस्य लक्षणं
चित्तवृत्तिनिरोधपदानां च व्याख्यानमभ्यासवैराग्यलक्षणं तस्योपा
यद्वयस्य स्वरूपं भेदं चाभिधाय संप्रज्ञातासंप्रज्ञातभेदेन योगस्य
मुख्यामुख्यत्वेन यो भेदस्तदुक्त्वा योगाभ्यासपूर्वकान्विस्तरेणोपाया
न्प्रदर्श्य सुगमोपायप्रदर्शनपरतयेश्वरस्य स्वरूपप्रमाणप्रभाव
वाचकोपासनाक्रमतत्फलानि निर्णीय चित्तस्य विक्षेपांस्तत्स
हभुवश्च दुःखादीन् विस्तरेण च तत्प्रतिषेधोपायानेकतत्वाभ्या
समैत्र्यादीन्प्राणायामादीनां संप्रज्ञातपूर्वाङ्गभूतविषयवतीप्रवृ
त्तिरित्यादीनाख्यायोपसंहारद्वारेण च समापत्तीः सलक्षणाः स
फलाः स्वस्वविषयसहिताश्चोक्त्वा संप्रज्ञातयोरुपसंहारमभिधा
य सबीजपूर्वको निर्बीजस्समाधिरिति व्याख्यातो योगपादः ॥ ॥
इति श्रीमहाराजभोजराजदेवविरचितायां पातञ्जलयोगशास्त्रवृत्तौ
प्रथमः पादः ॥ ॥ येनैते तु प्रयोगा हि सिद्धये येन दर्शिताः उपा
याः स जगत्त्राणदक्षस्तोस्तु प्रथितात्मये तदेवं प्रथमे पादे समाहित
चित्तस्य सोपायं योगमभिधाय व्युत्थितचित्तस्यापि कथमुपायाभ्या
सपूर्वको योगः सात्विकतामुपयातीति तत्साधनानुष्ठानप्रतिपादना
य क्रियायोगमाह ॥ तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः
तपः शास्त्रान्तरोपदिष्टं कृच्छ्रचान्द्रायणादि स्वाध्यायः प्रणवपूर्वा
णां मन्त्राणां जपः ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन्परमगुरौ
फलनिरपेक्षतया समर्पणम् एतानि क्रियायोग इत्युच्यते स कि
मर्थ इत्यत आह ॥ समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥
क्लेशा वक्ष्यमाणास्तेषां तनूकरणं स्वकार्यकरणप्रतिबन्धः समाधि
रुक्तलक्षणस्तस्य भावना चेतसि पुनः पुनर्निवेशनं सोऽर्थः प्र
योजनं यस्य स तथोक्तः एतदुक्तं भवति एते तपःप्रभृतयोऽभ्यस्य
माना अविद्यादीन् क्लेशांश्शिथिलीकुर्वन्तः समाधेरुप
कारकतां भजन्ते तस्मात्प्रथमतः क्रियायोगपरेण योगिना
भवितव्यमित्युपदिष्टं भवति क्लेशतनूकरणार्थ इत्युक्तं तत्र के
ते क्लेशा इत्यत आह ॥ अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा
क्लेशा अविद्यादयो वक्ष्यमाणलक्षणाः पञ्च ते च बाधनालक्षणं
परितापमुत्पादयन्तः क्लेशशब्दवाच्या भवन्ति ते हि चेतसि प्रव

पा॰ तां॰ नं॰ ८

तेमायाणांसंसारलक्षणंगुणपरिणामंद्रढयंति सत्यपिसर्वेषां
तुल्येक्लेशत्वेमूलभूतत्वादविद्यायाः प्राधान्यंप्रतिपादयितु-
माह ॥ अविद्याक्षेत्रमुत्तरेषांप्रसुप्ततनुविच्छिन्नोदाराणाम् ॥
अविद्यामोहः अनात्मन्यात्माभिमानइतियावत् साक्षेत्रंप्रसव
भूमिरुत्तरेषामस्मितादीनांप्रत्येकंप्रसुप्तादिभेदेनचतुर्विधा-
नाम् अतोयत्राविद्याविपर्ययज्ञानरूपाशिथिलीभवति तत्र
क्लेशानांनोद्भवोदृश्यतेविपर्ययज्ञानसद्भावेचतेषामुद्भवदर्श-
नात् इतिस्थितमेवमूलत्वमविद्यायाः प्रसुप्ततनुविच्छिन्नोदाराणा-
मिति येक्लेशाश्चित्तभूमौस्थिताः प्रबोधकाभावेनस्वकार्यं
नारभंतेतेप्रसुप्ताइत्युच्यंते यथाबालावस्थायांबालस्यहिवास-
नारूपेणस्थिताअपिक्लेशाः प्रबोधसहकार्यभावेनाभिव्यज्यंते
तेतनवो येस्वस्वप्रतिपक्षभावनयाशिथिलीकृताः तेविच्छिन्ना
येकेनचिद्बलवताक्लेशेनाभिभूतशक्तयस्तिष्ठंति यथाद्वेषाव-
स्थायांरागः रागावस्थायांवाद्वेषः नह्यनयोः परस्परविरुद्ध-
योर्युगपत्संभवोस्तितेउदाराः येप्राप्तसहकारिसंनिधयः स्वंस्वंका-
र्यमभिनिर्वर्तयंति यथासर्वदैवयोगपरिपंथिनोव्युत्थानद-
शायाम् एषांप्रत्येकंचतुर्विधानामपिमूलभूतत्वेनस्थिताप्यवि-
द्या अन्वयित्वेनप्रतीयते नहिक्वचिदपिक्लेशानांविपर्ययान्वय-
निरपेक्षाणांस्वरूपंलभ्यते तस्यांचमिथ्याभूतायांसम्यग्ज्ञानेननि-
वर्तितायांदग्धबीजकल्पानामेषांनक्वचित्प्ररोहोस्तिअतोविद्या-
निमित्तत्वमविद्यान्वयश्चैषांनिश्चीयते अतःसर्वेप्यविद्याव्यपदे-
शभाजः सर्वेषांचक्लेशानांचित्तविक्षेपकारित्वाद्योगिनाप्रथममे-
वतदुच्छेदेयत्नःकार्यइति अविद्यायालक्षणमाह ॥ अनित्या-
शुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्या अतस्मिं-
स्तदितिप्रतिभासोविद्येतिअविद्यायाःसामान्यलक्षणं
तस्याएवभेदप्रतिपादनम् अनित्येषुघटादिषुनित्यत्वाभिमा-
नोविद्येत्युच्यते एवमशुचिषुकायादिषुशुचित्वाभिमानः दुःखे-
षुविषयेषुसुखत्वाभिमानः एतेनापुण्येपुण्यभ्रमोनर्थेचार्थ-
भ्रमोव्याख्यातः ॥ अस्मितालक्षयितुमाह ॥ दृग्दर्शनश-
क्त्योरेकात्मतेवास्मिता दृक्शक्तिः पुरुषः दर्शनशक्तिः रजस्त-
मोभ्यामनभिभूतःसात्त्विकः परिणामोंतःकरणरूपः तयोर्भो-
क्तृभोग्यत्वेनावस्थितयोरत्यंतभिन्नयोरप्येकताभिमानो-

स्मितेत्युच्यते यथा प्रकृतिः वस्तुतः कर्तृत्वभोक्तृत्वरहितापि कर्त्र
हं भोक्त्राहमित्यभिमन्यते सोयमस्मिताख्यो विपर्यासक्लेशः ॥
रागस्य लक्षणमाह ॥ सुखानुशयी रागः ॥ सुखमनुशेते इ
ति सुखानुशयी सुखज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाधनेषु
तृष्णारूपो गर्धो रागसंज्ञः क्लेशः द्वेषस्य लक्षणमाह ॥ दुःखानु
शयी द्वेषः ॥ दुःखमुक्तलक्षणं तदभिज्ञस्य तदनुस्मृतिपूर्वं
कं तत्साधनेषु अनभिलषतो योयं निन्दात्मकः स द्वेषलक्षणः क्ले
शः ॥ अभिनिवेशलक्षणमाह ॥ स्वरसवाही विदुषोपि तथा
रूढोभिनिवेशः ॥ पूर्वजन्मानुभूतमरणदुःखानुभववासना
बलाद्भयरूपः समुपजायमानः शरीरविषयादिभिर्मम वियोगो
माभूदित्यन्वहमनुबन्धरूपः सर्वस्यैवाकृमेर्ब्रह्मपर्यन्तं निमित्तं वि
ना प्रवर्तमानोभिनिवेशाख्यः क्लेशः तदेवं व्याख्यातानां क्लेशानां बा
धकत्वादेकाग्रताभ्यासेन प्रथमं क्लेशाः परिहर्तव्याः तथाज्ञा
तानामेतेषां परिहाराः शक्याः कर्तुमिति तज्ज्ञानाय तेषामुद्दे
शं विभागं लक्षणं चाभिधाय स्थूलसूक्ष्मभेदभिन्नानां तेषां प्रहाणो
पायविभागमाह ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ ते सूक्ष्माः क्लेशा ये
वासनारूपेण स्थिता न वृत्तिरूपं परिणाममारभन्ते ते प्रतिप्रसवेन
प्रतिलोमपरिणामेन हेयास्त्यक्तव्याः स्वकारणास्मितायां कृता
र्थं सवासनं चित्तं यदा प्रतिष्ठं भवति तदा कुतस्तेषां निर्मूलानां स
म्भवः स्थूलानां हानोपायमाह ध्यानहेयास्तद्वृत्तयः ॥ तेषां क्ले
शानामारब्धकार्याणां याः स्थूलाः सुखदुःखमोहात्मिका वृत्तयस्ता ध्या
नेनैव चित्तैकाग्रतालक्षणेन हेया हातव्या इत्यर्थः चित्तपरिकर्मा
भ्यासमात्रेणैव स्थूलत्वात्तासां निवृत्तिर्भवति यथा वस्त्रादौ स्थूलः
लो मलः प्रक्षालनमात्रेणैव निवर्तते यस्तत्र सूक्ष्मः स तैस्तैरुपायैरुत्ता
पनप्रभृतिभिरेव निवर्तयितुं शक्यते एवं क्लेशानां तत्त्वमभिधाय
कर्माशयस्याभिधाय कर्माशयस्याभिधानमाह ॥ क्लेशमूलः क
र्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ कर्माशय इत्यनेन तस्य स्वरूप
मभिहितम् अतो वासनारूपाणि कर्माणि क्लेशमूल इत्यनेन
कारणमभिहितम् यतः कर्मणां शुभाशुभानां क्लेशा एव निमि
त्तम् दृष्टादृष्टजन्मवेदनीय इत्यनेन फलमुक्तम् अस्मिन्नेव ज
न्मनि अनुभवनीयो दृष्टवेदनीयः जन्मान्तरानुभवनीयोदृष्टवेदनीयः
तथाहि कानिचित्कर्माणि देवताराधनादीनि तीव्रसंवेगेन कृता

पा
ता
नं
९

तीहैव फलेन जात्यायुर्भोगलक्षणेन प्रयच्छन्ति यथा नन्दीश्वरस्य भगव-
न्महेश्वराराधनबलादिहैव जन्मनि जात्यायुर्भोगादयो विशिष्टाः
प्रादुर्भूताः एवमन्येषां विश्वामित्रादीनां तपःप्रभावाज्जात्यायुषी
केषांचिज्जातिरेव यथा तीव्रसंवेगेन दुष्कृतं कृतवतो नहुषस्य जात्यं-
तरपरिणामः उर्वश्याश्च कार्त्तिकेयवने लतारूपतया एवमन्य-
त्समस्तरूपेण यथायोगं योज्यं इदानीं कर्माशयस्य स्वभेदभिन्नं
फलमाह ॥ सति मूले तद्विपाको जात्यायुर्भोगाः ॥ मूलमुक्तलक्ष-
णाः क्लेशाः तेष्वनभिभूतेषु सत्सु कर्मणां कुशलाकुशलरूपाणां
विपाकः फलं जात्यायुर्भोगा भवन्ति जातिर्मनुष्यत्वादिः आयुश्चिरका-
लं कायसंबन्धः भोगा विषयाः इन्द्रियाणि सुखदुःखसंवित् कर्म
करणभावसाधनव्युत्पत्त्या भोगशब्दस्य वाच्यत्वात् इदमत्र तात्प-
र्यं चित्तभूमावनादिकालसंचिताः कर्मवासना यथा यथा पाक-
मुपयान्ति तथा तथा गुणप्रधानभावेन स्थिता जात्यायुर्भोगलक्षणं
स्वकार्यमारभन्ते उक्तानां कर्मफलानां जात्यादीनां स्वकारणक-
र्मानुसारेण कार्यकर्तृत्वमाह ॥ ते ह्लादपरितापफलाः पुण्या-
पुण्यहेतुत्वात् ह्लादः सुखं परितापः दुःखं ह्लादपरितापौ फलं
येषां ते तथोक्ताः पुण्यं कुशलं कर्म तद्विपरीतमपुण्यं ते पुण्यापु-
ण्यकारणं येषां तेषां भावस्तस्मात् एतदुक्तं भवति पुण्यकर्मार-
ब्धा जात्यायुर्भोगा ह्लादफलाः एतच्च प्राणिमात्रापेक्षया द्वैविध्यम् यो-
गिनस्तु सर्वं दुःखमित्याह परिणामतापसंस्कारदुःखैर्गुणवृत्ति-
विरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ परिज्ञातक्लेशादिविवेकस्य
परिदृश्यमानं सकलमेव भोगसाधनं सविषान्नवत् दुःखमेव प्र-
तिकूलवेदनीयमेवेत्यर्थः यस्मादत्यन्ताभिनिर्मलज्ञानो योगी
दुःखलेशेनाप्युद्विजते यथाक्षिपात्रमूर्णातन्तुस्पर्शमात्रेणैव मह-
तीं पीडामनुभवति नेतरद्गात्रम् तथा विवेकी स्वल्पदुःखे-
नापि विरज्यते कथमित्याह परिणामतापानां यथायथं गर्धाभिवृ-
द्धेस्तदप्राप्तिकृतस्य दुःखस्यापरिहार्यतया दुःखान्तरसाधनत्वा-
च्चास्त्येव दुःखरूपतेति परिणामदुःखत्वम् उपभुज्यमानेषु सुखसा-
धनेषु तत्प्रतिपन्थिनं प्रति द्वेषस्य सर्वदैवावस्थितत्वात् सुखानु-
भवकालेऽपि तापदुःखं दुष्परिहरमिति तापदुःखता संस्कारदुः-
खत्वं स्वाभिमतानभिमतविषयसंनिधाने सुखसंवित्दुःखसं-
विदुपजायमाना तथाविधमेव स्वक्षेत्रे चित्ते संस्कारमार-

भवेत् संस्काराच्च पुनस्तथाविधसंविद्भवत्यपरिमितसंस्कारोत्प-
त्तिद्वारेण संस्कारानुच्छेदात्सर्वं सैव दुःखत्वम् गुणवृत्तिविरोधा-
च्चेति गुणानां सत्त्वरजस्तमसां याः वृत्तयः सुखदुःखमोहरूपाः
परस्परमभिभाव्याभिभावकत्वेन विरुद्धा जायन्ते तासां सर्वत्रैव दुः-
खानुवेधाद्दुःखत्वम् एतदुक्तं भवति ऐकान्तिकात्यन्तिकीं च दुः-
खनिवृत्तिमिच्छतो विवेकिन उक्तरूपकारणचतुष्टयात्सर्वे विष-
याः दुःखरूपतया प्रतिभान्ति तस्मात्सर्वं कर्मविपाको दुःखरूप
एवेत्युक्तं भवति तदेवमुक्तक्लेशकर्माशयविपाकराशेरविद्या-
याश्च मिथ्याज्ञानरूपतया सम्यग्ज्ञानोच्छेद्यत्वात्सम्यग्ज्ञानस्य च साध-
नहेयोपादेयावधारणरूपत्वात्तदभिधानायाह हेयं दुःखमनागतम्।
भूतस्यातिक्रान्तत्वादनुभूयमानस्य च क्षणान्तरे हातत्वादनागतमे-
व संसारदुःखं हेयमित्युक्तं भवति हेयहेतुमाह ॥ द्रष्टृदृश्ययोः संयो-
गो हेयहेतुः ॥ द्रष्टा चिद्रूपः पुरुषः दृश्यं बुद्धितत्त्वं तयोरविवेक-
पूर्वको योऽसौ संयोगो भोग्यभोक्तृत्वेन संनिधानं स हेयस्य दुःखस्य गु-
णपरिणामस्य संसारस्य हेतुः कारणं तन्निवृत्त्या संसारनिवृत्तिर्भ-
वतीत्यर्थः द्रष्टृदृश्ययोः संयोग इत्युक्तं तत्र दृश्यस्य स्वरूपं कार्यं प्र-
योजनं चाह ॥ प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगाप-
वर्गार्थं दृश्यम् ॥ प्रकाशः सत्त्वधर्मः क्रिया प्रवृत्तिरूपा रजसः स्थि-
तिर्नियमरूपा तमसस्ताः प्रकाशप्रवृत्तिस्थितयः शीलं स्वाभावि-
कं रूपं यस्य तत्तथाविधमिति स्वरूपमस्य निर्दिष्टम् भूतेन्द्रियात्म-
कमिति भूतानि स्थूलसूक्ष्मभेदेन द्विविधानि पृथिव्यादीनि गन्धत-
न्मात्रादीनि च इन्द्रियाणि बुद्धीन्द्रियकर्मेन्द्रियान्तःकरणभेदेन त्रि-
विधानि उभयमेतद्ग्राह्यग्रहणरूपमात्मा स्वरूपाभिन्नः परिणामो
यस्य तत्तथाविधमिति अनेन कार्यमस्योक्तम् भोगः कथितलक्ष-
णः अपवर्गो विवेकख्यातिपूर्वकसंसारनिवृत्तिः तौ भोगापव-
र्गावर्थौ प्रयोजनं यस्य तत्तथाविधं दृश्यमित्यर्थः तस्य च दृश्य-
स्य नानावस्थारूपपरिणामात्मकस्य हेयत्वेन ज्ञातव्याः तत्तदवस्था
कथयितुमाह ॥ विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वा-
णि ॥ गुणानां पर्वाण्यवस्थाविशेषाश्चत्वारो ज्ञातव्या इत्युपदि-
ष्टं भवति तत्र विशेषा महाभूतेन्द्रियाणि अविशेषास्तन्मात्रा-
न्तःकरणानि लिङ्गमात्रं बुद्धिः अलिङ्गमव्यक्तमित्युक्तं सर्वत्र गुणरू-
पस्याप्यक्षयाणामन्वयित्वेन प्रत्यभिज्ञानादवश्यं ज्ञातव्यत्वं तेन योगा-
कालेन चत्वारि पर्वाणि निर्दिष्टानि ॥ एवं हेयत्वेन दृश्यस्य स्वरूपम-

तानव्याने दृश्यस्य सहितं व्याख्यायोपादेयं द्रष्टारं व्याकर्तुमाह ॥
द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ द्रष्टा पुरुषः दृशिमात्रः
चेतनामात्रः मात्रग्रहणं धर्मधर्मिनिरासार्थम् केचिद्धि चेतनामात्म
नो धर्ममिच्छन्ति स शुद्धोऽपि परिणामित्वाद्यभावेन स्वप्रतिष्ठोऽपि
प्रत्ययानुपश्यः प्रत्यया विषयोपरक्तानि ज्ञानानि तान्यन्वव्यवधा
नेन प्रतिसंक्रमादिभावेन पश्यति एतदुक्तं भवति जातविषयो
परागायामेव बुद्धौ सन्निधानमात्रेणैव पुरुषस्य द्रष्टृत्वमिति ॥
स एव भोक्तेत्याह ॥ तदर्थ एव दृश्यस्यात्मा ॥ दृश्यस्य प्रागु
क्तलक्षणस्यात्मा यत्स्वरूपं तदर्थः तस्य पुरुषस्य भोक्तृत्वसंपा
दने नाम स्वार्थपरिहारेण प्रयोजनम् नहि प्रधानं प्रवर्तमानमा
त्मनः किंचित्प्रयोजनमपेक्ष्य प्रवर्तते किंतु पुरुषस्य भोगं संपा
दयामीति यद्येवं पुरुषस्य भोगसंपादनमेव प्रयोजनं तदा संपादि
ते तस्मिंस्तन्निष्प्रयोजनं विरतव्यापारं स्यात् तस्मिंश्च परिणाम
शून्ये शुद्धत्वात्सर्वे द्रष्टारो बन्धरहिताः स्युः ततश्च संसारोच्छेद
इत्याशंक्याह ॥ कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वा
त् ॥ यद्यपि विवेकख्यातिपर्यन्ताद्भोगसंपादनात्कमपि कृ
तार्थं पुरुषं प्रति तन्नष्टं विरतव्यापारम् तथापि सर्वपुरुषसाधा
रणत्वादन्यान्प्रत्यनष्टव्यापारमवतिष्ठते अतः प्रधानस्य सक
लभोक्तृसाधारणत्वान्न कदाचनापि विनाशः एकस्य मुक्तौ वा
न सर्वेषां मुक्तिप्रसंग इत्युक्तं भवति ॥ दृश्यद्रष्टारौ व्याख्याय संयो
गं व्याख्यातुमाह ॥ स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः सं
योगः ॥ कार्यद्वारेणास्य लक्षणं करोति स्वशक्तिर्दृश्यस्वभावः
स्वामिशक्तिर्द्रष्टुः स्वरूपम् तयोर्द्वयोरपि संवेद्यसंवेदकत्वेन
व्यवस्थितयोर्या स्वरूपोपलब्धिस्तस्याः कारणं यः संयोगः स
च सहजो भोग्यभोक्तृत्वभावेन स्वरूपान्नान्यः नहि तयो
र्नित्ययोर्व्यापकयोश्च स्वरूपादन्यः तस्यापि कारणमाह ॥ त
स्य हेतुरविद्या ॥ या पूर्वं विपर्यासात्मिका मोहरूपा विद्या व्याख्या
ता सा तस्याविवेकख्यातिरूपस्य संयोगस्य कारणम् हेयं हा
नक्रियाकर्माप्यते किंपुनस्तद्धानमित्याह तदभावात्संयो
गाभावो हानं तद्दृशेः कैवल्यम् ॥ तस्या अविद्यायाः स्वरूपवि
रुद्धेन सम्यग्ज्ञानेनोन्मूलितायाः योऽयमभावः तस्मिन्सति तत्का
र्यस्य संयोगस्याप्यभावः तद्धानमित्युच्यते अयमर्थः नैतस्यामू
र्तद्रव्यवत्परित्यागो युज्यते किंतु जातायां विवेकख्यातावऽवि

वेकनिमित्तः संयोगः स्वयमेव निवर्तत इति तस्य हानम् यदेव च सं-
योगस्य हानं तदेव नित्यं केवलस्यापि पुरुषस्य कैवल्यमपदिश्यते
तदेवं संयोगस्य स्वरूपं कारणं कार्यं चाभिहितम् अथ हानोपायक-
थनद्वारेणोपादेयकारणमाह ॥ विवेकख्यातिरविप्लवा हानो-
पायः ॥ अन्ये गुणाः अन्यः पुरुष इत्येवंविधस्य विवेकस्य या ख्या-
तिः प्रख्या सा हानस्य दृश्यपरित्यागोपायः कारणम् कीदृशी
अविप्लवा न विद्यते विप्लवो विच्छेदोऽन्तरान्तरा व्युत्थानरूपो यस्याः साविप्लवा
इदमत्र तात्पर्यम् प्रतिपक्षभावनाबलादविद्याप्रविलये निवृत्तक-
र्तृत्वाभिमानायाः रजस्तमोमलानभिभूताया बुद्धेरन्तर्मु-
खाया चितिच्छायासंक्रान्तिः सा विवेकख्यातिरुच्यते तस्यां सततत्वेन
प्रवृत्तायां दृश्यस्याधिकारनिवृत्तेर्भवत्येव कैवल्यम् उक्तत्र विवेक-
ख्यातेः पुरुषस्य यादृशी प्रज्ञा भवति तां कथयन् विवेकख्यातेः स्व-
रूपमाह ॥ तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ तस्योत्पन्नविवेकज्ञा-
नस्य ज्ञातव्यविवेकरूपा प्रज्ञा प्रान्तभूमौ सकलसालम्बनसमाधिभू-
मिपर्यन्ते सप्तप्रकारा भवति तत्र कार्यविमुक्तिरूपा चतुःप्रकारा ज्ञा-
तं मया ज्ञेयं न ज्ञातव्यं किंचिदस्ति क्षीणा मे क्लेशाः न मे किंचित्क्षेत-
व्यमस्ति अधिगतं मया ज्ञानम् प्राप्ता मया विवेकख्यातिरिति प्रत्य-
यान्तरपरिहारेण तस्यामवस्थायामीदृश्येव प्रज्ञा जायते ईदृशी-
प्रज्ञा कार्यविषया निर्मलज्ञाने कार्यविमुक्तिरित्युच्यते चित्तविमु-
क्तिस्त्रिधा चरितार्था मे बुद्धिः गुणाः कृताधिकाराः गिरिशिखर-
निपतिता इव ग्रावाणो न पुनः स्थितिं यास्यन्ति स्वकारणे प्रलयाभि-
मुखानां मोहाभिधानमूलकारणाभावान्निष्प्रयोजनत्वाच्चामी-
षां कुतः प्ररोहः सात्मीभूतश्च मे समाधिः तस्मिन्सति स्वरूपप्र-
तिष्ठोऽहमिति ईदृशी त्रिप्रकाराप्राभूमिप्रज्ञायामुपजातायां पुरु-
षः केवल इत्युच्यते विवेकख्यातिः संयोगाभावहेतुरित्युक्तम्
तस्याः समुत्पत्तौ किं निबन्धनमित्यत आह ॥ योगाङ्गानुष्ठानादशुद्धिक्ष-
ये ज्ञानदीप्तिराविवेकख्यातेः ॥ योगाङ्गानि वक्ष्यमाणानि तेषामनु-
ष्ठानाज्ज्ञानपूर्वकादभ्यासादाविवेकख्यातेरविशुद्धिक्षये चित्त-
सत्त्वस्य प्रकाशावरणलक्षणक्लेशरूपायामशुद्धिक्षये या ज्ञानदीप्ति-
स्तारतम्येन सात्त्विकः परिणामो विवेकख्यातिः सततस्याः ख्यातेर्हे-
तुरित्यर्थः योगाङ्गानुष्ठानादशुद्धिक्षय इत्युक्तम् कानि पुनस्ता-
नि योगाङ्गानीति तेषामुद्देशमाह ॥ यमनियमासनप्राणाया-

पा· तो· नं· ॥

ध्यानसमाधयोऽष्टावंगानि ॥ इह कानिचित्समाधेः साक्षादुपकार
कत्वेनांतरंगाणि यथा धारणादीनि कानिचित्प्रतिपक्षभूतहिं
सादिवितर्कोन्मूलनद्वारेण समाधेरुपकुर्वंति यथा यमनियमा
दयः तत्रासनादीनामुत्तरोत्तरमुपकारकत्वम् यथा सत्यासनज
ये प्राणायामस्थैर्यम् एवमुत्तरत्रापि योज्यम् क्रमेणैषां स्वरूपमाह
अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ तत्र प्राणवियोगप्र
योजनव्यापारो हिंसा सा च सर्वानर्थहेतुः तदभावोऽहिंसा हिंसायाः
सर्वकालमेव परिहार्यत्वात् प्रथमं तदभावरूपाया अहिंसाया
निर्देशः सत्यं वाङ्मनसयोर्यथार्थत्वम् स्तेयं परस्वापहरणम् त
दभावोऽस्तेयम् ब्रह्मचर्यमुपस्थसंयमः अपरिग्रहो भोगसाधनाना
मस्वीकरणम् त एते हिंसादयः पंच यमशब्दवाच्याः योगांगत्वे
नोपदिष्टाः ॥ एषां विशेषमाह ॥ एते जातिदेशकालसमया
नवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ जातिर्ब्राह्मणत्वादिः देश
स्तीर्थादिः कालश्चतुर्दश्यादिः समयो ब्राह्मणप्रयोजनादिः एतैश्च
तुर्भिरनवच्छिन्नाः पूर्वोक्ता अहिंसादयो यमाः सर्वास्वेव क्षिप्तादिषु भू
मिषु भवा महाव्रतमित्युच्यते तद्यथा ब्राह्मणं न हनिष्यामि ती
र्थे कंचन न हनिष्यामि चतुर्दश्यां न हनिष्यामीति एवं चतुर्वि
धावच्छेदव्यतिरेकेण किंचित्क्वचित्कदाचित्कस्मिंश्चिदप्य
र्थे न हनिष्यामीत्यनवच्छिन्नाः एवं सत्यादिषु यथायोगं योज्यम् इ
त्थमनियतीकृताः सामान्येनैव प्रवृत्ता महाव्रतमित्युच्यते न पु
नः परिमितावधारणम् ॥ नियमानाह ॥ शौचसंतोषतपःस्वाध्या
येश्वरप्रणिधानानि नियमाः ॥ शौचं द्विविधं बाह्यमाभ्यंतरं च
बाह्यं मृज्जलादिभिः कायादिप्रक्षालनम् आंतरं मैत्र्यादिभिश्चित्तमला
नां प्रक्षालनम् संतोषस्तुष्टिः शेषाः प्रागेव कृतव्याख्यानाः एते
शौचादयो नियमशब्दवाच्याः कथमेषां योगांगत्वमित्यत आ
ह वितर्कबाधने प्रतिपक्षभावनम् ॥ वितर्क्यंत इति वितर्काः
योगपरिपंथिनो हिंसादयः तेषां बाधने प्रवृत्तिः प्रतिपक्षभा
वने सति यदि बाधा भवति तदा योगः सुकरो भवतीति भवत्ये
व यमनियमानां योगांगत्वम् ॥ इदानीं वितर्काणां स्वरूपं भेदं
कारणं प्रकारं फलं च क्रमेणाह ॥ वितर्का हिंसादयः कृतका
रितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःख
ज्ञानानंतफला इति प्रतिपक्षभावनम् ॥ ॥ एते पूर्वोक्ता हिंसा

दयः प्रथमं त्रिधा भिद्यन्ते कृतकारितानुमोदितभेदेन तत्र स्वयं नि
ष्पादिताः कृताः कुरु कुर्विति प्रयोजकव्यापारेण समुत्पादिताः का
रिताः अन्येन क्रियमाणाः साध्वित्यङ्गीकृता अनुमोदिताः एतच्च
त्रैविध्यं परस्परव्यामोहनिवारणायोच्यते अन्यथा मन्दमतिरेवं म
न्येत न मया हिंसा कृतेति नास्ति मे दोष इति एतेषां कारणप्रतिपा
दनायाह लोभः प्रथमं निर्दिष्टस्तथापि सर्वक्लेशानां मोहस्यानात्म
न्यात्माभिमानलक्षणस्य निदानत्वात्तस्मिन्सति स्वपरविभागपूर्वं
कत्वेन लोभक्रोधादीनामुद्भवात् मूलत्वमवसेयं मोहपूर्वकम
सर्वो दोषजात इत्यर्थः लोभस्तृष्णा क्रोधः कृत्याकृत्यविवेको
न्मूलकः प्रज्वलनात्मकश्चित्तधर्मः प्रत्येकं कृतादिभेदेन त्रिप्रका
रा अपि हिंसादयो मोहादिकारणत्वेन त्रिधा भिद्यन्ते एषां पुनरवं
स्थाभेदेन त्रैविध्यमाह मृदुमध्याधिमात्राः मृदवो मन्दाः न तीव्राः
नापि मध्याः मध्याः न मन्दा नापि तीव्राः अधिमात्राः तीव्रा न मध्याः
नापि मन्दा इत्येवं नव भेदाः इत्थं त्रैविध्ये सति सप्तविंशतिः मृद्वादीना
मपि प्रत्येकं मृदुमध्याधिमात्रभेदात्त्रैविध्यं संभवति तद्यथायोगं यो
ज्यम् तद्यथा मृदुमृदुमध्यो मृदुतीव्र इति एषां फलमाह दुःखाज्ञाना
नन्तफलाः दुःखं प्रतिकूलतया भासमानो राजसश्चित्तधर्मः अज्ञानं
मिथ्याज्ञानं संशयविपर्ययरूपं ते दुःखाज्ञाने अनन्तमपरिच्छिन्नं फलं
येषां ते तथोक्ता इत्थमेषां स्वरूपकारणादिभेदेन ज्ञातानां प्रतिप
क्षभावनया योगिना परिहारः कर्तव्य इत्युपदिष्टं भवति ॥ एषाम
भ्यासात्प्रकर्षमागच्छतामनुनिष्पादिन्यः सिद्धयो यथा भवन्ति त
था क्रमेण प्रतिपादयितुमाह ॥ अहिंसाप्रतिष्ठायां तत्सन्निधौ वै
रत्यागः ॥ तस्याहिंसां भावयतः सन्निधौ सहजविरोधिनामप्यहि
नकुलादीनां वैरत्यागो निर्मत्सरतयावस्थानं भवति हिंसारता हिं
स्रत्वं परित्यजन्तीति भावः सत्याभ्यासवतः किं भवतीत्याह ॥ सत्य
प्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥ क्रियमाणा हि क्रियाः स्वर्गा
दिकं फलं प्रयच्छन्ति तस्य तु सत्याभ्यासवतो योगिनस्तथा सत्यं प्रकृ
ष्यते यथाकृतायामपि क्रियायां योगी फलमाप्नोति तद्वचनाद्यस्य
कस्यचित्क्रियामकुर्वतोपि क्रियाफलं भवतीत्यर्थः ॥ अस्तेयाभ्या
सवतः फलमाह अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् अस्तेयं य
दाभ्यासफलमाह तदास्य प्रकर्षान्निरभिलाषस्यापि सर्वतो दिव्या
नि रत्नान्युपतिष्ठन्ते ॥ ब्रह्मचर्याभ्यासफलमाह ॥ ब्रह्मचर्यप्रतिष्ठा

पा॰
ता॰
नं॰
१२

र्यंवीर्यलाभः॥ यः किल ब्रह्मचर्यमभ्यस्यति तस्य तत्प्रकर्षान्निर-
तिशयं वीर्यं सामर्थ्यमाविर्भवति वीर्यनिरोधो हि ब्रह्मचर्यं तस्य प्रकर्षा-
त् शरीरेन्द्रियमनस्सु वीर्यं प्रकर्षमागच्छति ॥ अपरिग्रहाभ्या-
सफलमाह ॥ अपरिग्रहस्थैर्ये जन्मकथन्तासंबोधः ॥ कथ-
मित्यस्य भावः कथन्ता जन्मनः कथन्ता जन्मकथन्ता तस्याः सं-
बोधः जन्मान्तरे कोऽहमासं कीदृशः किंकार्यकारीति जिज्ञासायां
सर्वमेव सम्यग्जानातीत्यर्थः न केवलं भोगसाधनपरिग्रह एव
परिग्रहः न केवलं भोगसाधनपरिग्रह एव परिग्रहः यावदात्मनः
शरीरपरिग्रहोऽपि परिग्रहः भोगसाधनत्वाच्छरीरस्य तस्मिन्स-
ति रागानुबन्धाद्बहिर्मुखायामेव प्रवृत्तौ न तात्त्विकज्ञानप्रादुर्भा-
वः यदा पुनः शरीरादिपरिग्रहनैरपेक्ष्येण माध्यस्थ्यमालम्बते त-
दा मध्यस्थस्य रागादित्यागात्सम्यग्ज्ञानहेतुर्भवत्येव पूर्वापरजन्म-
संबोधः ॥ शौचाभ्यासवतः फलमाह ॥ शौचात्स्वाङ्गजुगुप्सा परैर-
संसर्गः ॥ यः शौचं भावयति तस्य स्वाङ्गेष्वपि कारणालोचनद्वारेण जुगुप्सा घृणा समुपजायते अशुचिरयं कायो
नात्राग्रहः कार्य इत्यनेनैव हेतुना परैरन्यैश्च कायवद्भिः संसर्ग-
संसर्गाभावः संसर्गपरिवर्जनमित्यर्थः यः किल स्वमेव कायं
जुगुप्सते तत्तदवद्यदर्शनात्स कथं परकीयैस्तथाभूतैः कायैः संस-
र्गमनुभवति ॥ शौचस्यैव फलान्तरमाह ॥ सत्त्वशुद्धिसौमनस्यै-
काग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ भवन्तीति वाक्यशेषः
सत्त्वं प्रकाशसुखाद्यात्मकं तस्य शुद्धिः रजस्तमोभ्यामनभिभवः
सौमनस्यं खेदाननुभवेन मानसी प्रीतिः एकाग्रता नियते इन्द्रियवि-
षये चेतसः स्थैर्यम् इन्द्रियजयो विषयपराङ्मुखानामिन्द्रियाणा-
मात्मन्यवस्थानं आत्मदर्शने विवेकख्यातिरूपे चित्तस्य योग्यत्वं
समर्थत्वं शौचाभ्यासवत एते सत्त्वशुद्ध्यादयः क्रमेण प्रादुर्भव-
न्ति तथाहि शौचात्सत्त्वशुद्धिः सत्त्वशुद्धेः सौमनस्यं सौमनस्या-
देकाग्रता एकाग्रताया इन्द्रियजयः इन्द्रियजयादात्मदर्शनयो-
ग्यतेति ॥ संतोषाभ्यासफलमाह ॥ संतोषादनुत्तमः सुखला-
भः ॥ संतोषप्रकर्षेण योगिनस्तथाविधमान्तरं सुखमाविर्भवति
यस्य बाह्यविषयसुखं लेशेनापि न समम् ॥ तपसः फलमाह ॥
कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ तपः समभ्यस्यमानं चे-
तसः क्लेशादिलक्षणाशुद्धिक्षयद्वारेण कायेन्द्रियाणां सिद्धिमुत्क-

र्भ्यासाद्यानि प्रयमर्थः चांद्रायणादिना चित्तक्लेशक्षयः तत्क्षयादि
न्द्रियाणां सूक्ष्मव्यवहितविप्रकृष्टदर्शनादिसामर्थ्यमाविर्भवति ।
कायस्य यथेच्छमणुत्वमहत्वादीनि ॥ स्वाध्यायस्य फलमाह अ
भिप्रेतमंत्रजपादिलक्षणे स्वाध्याये प्रकृष्यमाणे योगिन इष्टया
भिप्रेतया देवतया संप्रयोगो भवति सा देवता प्रत्यक्षा भवतीत्य
र्थः ईश्वरप्रणिधानस्य फलमाह ॥ समाधिसिद्धिरीश्वरप्रणि
धानात् ईश्वरे योयं भक्तिविशेषस्तस्मात्समाधेरुक्तलक्षण
स्याविर्भावो भवति यस्मात्स भगवानीश्वरः प्रसन्नः सन्नंतराय
रूपान्क्लेशान्परिहृत्य समाधिमुद्बोधयति ॥ यमनियमानुक्त्वा
सनमाह ॥ तत्र स्थिरसुखमासनम् ॥ आस्यतेनेनेत्यासनम् ॥
पद्मासनदंडासनस्वस्तिकासनादि तद्यदा स्थिरं निष्कंपं सुखमनु
द्वेजनीयं च भवति तदा तद्योगांगतां भजते ॥ तस्यैव स्थिरसु
खतायै तदुपायमाह ॥ प्रयत्नशैथिल्यानंत्यसमापत्तिभ्याम् ॥
तदासनं प्रयत्नशैथिल्येनानंत्यसमापत्त्या च स्थिरं सुखं च भवतीति
संबंधः यदा यदासनं बध्नामीतीच्छां करोति प्रयत्नशैथिल्येपि अ
क्लेशेनैव तदासनं निष्पद्यते यदाकाशादिगतेअनंते तमः समा
पत्तिः क्रियते चेतसा तदात्म्यमापाद्यते तदा देहाहंकाराभावा
दासनं दुःखजनकं भवति अस्मिंश्चासनजये सति समाध्यंतरायभू
ता न प्रभवत्यंगमेजयत्वादयः ॥ तस्यैवानुनिष्पादि फलमाह ॥
ततो द्वंद्वानभिघातः ॥ तस्मिन्नासनजये सति द्वंद्वैः शीतोष्णक्षुत्तृ
ष्णादिभिर्योगी न हन्यत इत्यर्थः ॥ आसनजयादनंतरं प्राणाया
ममाह ॥ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः आसने
जये सति गतिविच्छेदलक्षणो यो भवति कीदृशः श्वासप्रश्वासयोर्गति
विच्छेदलक्षणः श्वासप्रश्वासौ कृतलक्षणौ तयोस्त्रिधा रेचन
स्तंभनपूरणद्वारेण बाह्याभ्यंतरेषु स्थानेषु गतेः प्रवाहस्य वि
च्छेदो धारणं प्राणायाम उच्यते ॥ तस्यैव सामान्यलक्षणस्य विभज्य
स्वरूपं कथयति स तु बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः
परिदृष्टो दीर्घसूक्ष्मः बाह्यवृत्तिः श्वासो रेचकः अंतर्वृत्तिः प्रश्वास
पूरकः अंतस्तंभवृत्तिः कुंभकः तस्मिन् जलमिव कुंभे निश्चलत
या प्राणा अवस्थाप्यंते इति कुंभकः त्रिविधोयं प्राणायामो देशे
न कालेन संख्यया चोपलक्षितो दीर्घसूक्ष्मसंज्ञो भवति देशेनो
पलक्षितो यथा नासाद्वादशांतोपलक्षितो गम्या बहिर्भिन्मात्रा

पा ता जं १३

प्मात्रादिप्रमाणः संख्योपलक्षितो यथा इयतो वारान्कृत ए-
तावद्भिः श्वासप्रश्वासैः प्रथम उद्घातो भवति इत्येतज्ज्ञानाय संख्याग्र-
हणमुपात्तम् त्रीन्प्राणायामानभिधाय चतुर्थमभिधातुमाह
बाह्याभ्यंतरविषयाक्षेपी चतुर्थः ॥ प्राणस्य बाह्यो विषयो
द्वादशांतादिः आंतरो विषयो हृदयनाभिचक्रादिः तौ द्वौ विषयौ
आक्षिप्य पर्यालोच्य स्तंभरूपो गतिविच्छेदः पर्यालोच्यैवः प्राणा-
यामः तृतीयस्मात्कुंभकाख्यादयमस्य विशेषः स बाह्याभ्यंतरौ
विषयावपर्यालोच्यैव सहसा तप्तोपलनिपतितजलन्यायेन
युगपत्स्तंभवृत्त्या निष्पद्यते अस्य तु विषयद्वयाक्षेपको निरोधः
अयमपि पूर्ववद्देशकालसंख्याभिरुपलक्षितो द्रष्टव्यः चतुर्विधस्य
स्य फलमाह ततः क्षीयते प्रकाशावरणम् ततस्तस्मात्प्राणाया-
मात्प्रकाशस्य चित्तसत्त्वगतस्य यदावरणं क्लेशरूपं तत्क्षीयते
विनश्यतीत्यर्थः ॥ फलांतरमाह ॥ धारणासु च योग्यता मन-
सः ॥ धारणा वक्ष्यमाणलक्षणाः तासु प्राणायामैः क्षीणदोषं
मनो यत्र यत्र धार्यते तत्र तत्र स्थिरीभवति न विक्षेपं भजते ॥ प्रत्या-
हारस्य लक्षणमाह ॥ स्वविषयासंप्रयोगे चित्तस्वरूपानुकार
इवेंद्रियाणां प्रत्याहारः ॥ इंद्रियाणि स्वस्वविषयेभ्यः प्रतीपमा-
ह्रियंतेस्मिन्निति प्रत्याहारः स च कथं निष्पद्यत इत्याह चक्षुरादीना-
मिंद्रियाणां स्वः स्वो विषयो रूपादिः तेन संप्रयोगस्तदाभिमुख्ये-
न वर्तनम् तदभावः तदाभिमुख्यं परित्यज्य स्वरूपमात्रेवस्थानं
तस्मिन्सति चित्तस्वरूपमात्रानुकारीणींद्रियाणि भवंति यतश्चि-
त्तमनुवर्तमानानि मधुकरराजमिव मधुकरमक्षिकाः सर्वाणी-
द्रियाणि प्रतीयंते अतश्चित्तनिरोधे तानि प्रत्याहृतानि भवंति ते-
षां तत्स्वरूपानुकारः प्रत्याहार उक्तः फलमाह ॥ ततः परमा-
वश्यतेंद्रियाणाम् ॥ अभ्यस्यमाने हि प्रत्याहारे तथावश्या-
न्यायत्तानींद्रियाणि संपद्यंते यथा बाह्यविषयाभिमुखतां नीय-
मानान्यपि न यांतीत्यर्थः तदेवं प्रथमपादोक्तलक्षणस्य योग-
स्यांगभूतं क्लेशतनूकरणफलं क्रियायोगमभिधाय क्लेशाना-
मुद्देशं स्वरूपं कारणं चाभिहितम् ततस्त्याज्यत्वात् क्लेशानां ज्ञान-
व्यतिरेकेण त्यागस्याशक्यत्वाज्ज्ञानस्य च शास्त्रायत्तत्वाच्छास्त्रस्य च
हेयहेयकारणहानहानकारणात्मकचतुर्व्यूहत्वाद्धेयस्य
च हानव्यतिरेकेण स्वरूपानिष्पत्तेः ज्ञानसहितमभिधायोपादे

यकारणभूतायाविवेकख्यातेःकारणभूतानांमेतेषांगवहिरंग
भावेनस्थितानांयोगांगानांयमादीनांस्वरूपंफलसहितंव्याकृत्य
धारणादीनांचासनादीनांपरस्परंमुपकार्योपकारकभावेनावस्थि
तानामुद्देशमभिधायप्रत्येकलक्षणपूर्वकंफलमभिहितम् त-
देवंयोगांगयमनियमादिभिःआसनवीजभावःआसनजयेनप्राणाया-
मस्थैर्यकृतिःप्रत्याहारेणक्रमभिन्नाध्यानधारणासमाधिभिःफ-
लिःख्यातिरित्याख्यातःसाधनपादः ॥ ॥ इतिश्रीभोजराज-
विरचितायांपातंजलियोगशास्त्रसूत्रवृत्तौसाधनपादोद्वितीयः २ ॥
ॐ यत्पादपद्मस्मरणादणिमादिविभूतयः भवंतिभविनाम
सभूतनाथःसभूतये ॥ तदेवंपूर्वोद्दिष्टधारणाद्यंगत्रयंनिर्णे-
तुंसंयमसंज्ञाभिधानपूर्वंवाह्याभ्यन्तरादिसिद्धिप्रतिपादनाय-
लक्षयितुमुपक्रमते ॥ तत्रधारणायाःस्वरूपमाह ॥ देशवं-
धश्चित्तस्यधारणा ॥ देशनासाग्रादौचित्तस्यवंधोविषयां-
तरपरिहारेणयत्स्थिरीकरणंसाचित्तस्यपरिकर्मवासितां-
तःकरणेनयमनियमवताजितासनेनपरिहृतप्राणविक्षेप
णप्रत्याहृतेन्द्रियग्रामेणनिर्वाधेदेशऋजुकायेनजितद्वंद्वेनयो-
गिनानासाग्रादौसंप्रज्ञातेनसमाधेरभ्यासायचेतसःस्थिरीकर
णंकर्तव्यमिति ॥ धारणामभिधायध्यानमभिधातुमाह ॥
तत्रप्रत्ययैकतानताध्यानम् ॥ तस्मिन्देशेयत्रचित्तंधृतं।
तत्रप्रत्ययस्यज्ञानस्ययायैकतानताविसदृशपरिणामपरिहा-
रद्वारेणयदेवधारणायामालम्बनीकृतंतदवलम्बनत-
येवनिरंतरमुत्पत्तिःसाध्यानमुच्यते चरमंयोगांगंसमाधिमा-
ह ॥ तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिः तदेवोक्तलक्ष-
णंध्यानंयत्रार्थमात्रनिर्भासंप्रत्ययाकारसमावेशाद्भूतार्थाकृ-
यत्वाभूतत्वात्स्वरूपेनस्वरूपशून्यतामापद्यतेसमाधिर-
त्युच्यतेसम्यगाधीयतेएकाग्रीक्रियतेविक्षेपान्परिहृत्ययत्रम-
नःससमाधिः उक्तलक्षणस्ययोगांगत्रयस्यव्यवहाराययोगिकीं
संज्ञांकर्तुमाह ॥ तज्जयात्प्रज्ञालोकः ॥ तस्यसंयमस्यजया-
दभ्यासेनसात्म्यत्वादनायासेनायातानंयंसम्यगवभासनमित्यर्थः :
तस्योपयोगमाह तस्यभूमिषुविनियोगः तस्यसंयमस्यभू-
मिषुस्थूलसूक्ष्मालंबनभेदेनस्थितासुचित्तभूमिषुविनियो-
गःकर्तव्यःअधरामधरांचित्तभूमिंजितांजितांज्ञात्वोत्तरस्यांभूमौ-

पा ता सं १४

ंयमः तस्य भावनात्मैकतापरभूमिकृतेरस्याभूमौ संयमेन जया
णः फलभाग्भवति ॥ साधनपादे योगांगान्यष्टावुपदिश्य पं
चानां लक्षणं विधाय त्रयाणां कथं न कृतमित्याशंकयाह ॥
त्रयमंतरंगं पूर्वेभ्यः ॥ पूर्वेभ्यो यमादिभ्यो योगांगेभ्यः पा
रंपर्येण समाधेरुपकारकेभ्यो धारणादियोगांगत्रयं संप्र
ज्ञातस्य समाधेरंतरंगं समाधिस्वरूपनिष्पादनम् तस्यापि स
माध्यंतरापेक्षया बहिरंगत्वमाह ॥ तदपि बहिरंगं निर्बी
जस्य निर्बीजस्य निरालंबनस्य शून्यभावनापरपर्यायस्य समा
धेरेतदपि योगांगत्रयं बहिरंगं पारंपर्येणोपकारकत्वात् ॥ ॥
इदानीं योगांगसिद्धिकं त्रक्रमेण परिणामत्रयमाह ॥ व्युत्थान
निरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो नि
रोधपरिणामः ॥ व्युत्थानं क्षिप्तमूढविक्षिप्ताख्यं भूमित्रयं नि
रोधः प्रकृष्टसत्त्वांगनिरोधस्ताभ्यां जनितौ यौ चेतसः संस्कारौ
तयोर्यथाक्रममभिभवप्रादुर्भावौ यदा भवतः अभिभवस्तिरो
भूततया कार्यकरणासामर्थ्येनावस्थानम् प्रादुर्भावो व
र्तमानेऽध्वन्यभिव्यक्तरूपतयावस्थानम् तदा निरोधक्षणे
चित्तस्योभयवृत्तित्वादन्वयः स निरोधपरिणाम इत्युच्यते
अयमर्थः यदा व्युत्थानसंस्काररूपो धर्मस्तिरोभूतो भवति ॥
निरोधसंस्काररूपश्चाविर्भवति धर्मिरूपतया च चित्तमुभय
यान्वयित्वेनावस्थितं भवति स निरोधपरिणामशब्देनव्यव
ह्रियते चलत्वाद्गुणवृत्तेर्यद्यपि चेतसो निश्चलत्वं नास्ति
तथाप्येवंभूतपरिणामः स्थैर्यमुच्यते ॥ अस्यैव फलमाह ॥
तस्य प्रशान्तवाहिता संस्कारात् ॥ तस्य चेतसः उक्तान्निरोध
संस्कारात्प्रशान्तवाहिता भवति परिहृतविक्षेपतया चित्तं
सदृशप्रवाहपरिणामि भवतीत्यर्थः ॥ निरोधपरिणाम
मभिधाय समाधिपरिणाममाह ॥ सर्वार्थतैकाग्रतयोः क्षयो
दयौ चित्तस्य समाधिपरिणामः ॥ सर्वार्थता चलत्वान्नाना
विधार्थग्रहणम् चित्तस्य विक्षेपो धर्मः एकस्मिन्नेवालंबने
सदृशपरिणामितैकाग्रता सापि चित्तस्य धर्मः तयोर्यथा
क्रमं क्षयोदयौ सर्वार्थतालक्षणस्यान्वयितयावस्थानं समाधि
परिणाम इत्युच्यते पूर्वस्मात्परिणामादस्यायं विशेषः तत्र सं
स्कारलक्षणयोर्धर्मयोरभिभवप्रादुर्भावौ पूर्वस्य व्युत्थाना

संस्कारस्योदयाभावः उभयस्य निरोधसंस्कारद्वयस्योद्भवेनाभिभू-
तत्वेनावस्थानमिह तु तयोरुदयाविति सर्वार्थतालक्षणस्योद्भवेस्य
वर्तमानेऽध्वनि प्रकारत्वम् ततो यमेकाग्रतापरिणाममाह ॥
शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ समाहि-
तस्यैव चित्तस्यैकः प्रत्ययो वृत्तिविशेषः शान्तोऽतीतमध्वानं प्रवि-
ष्टः अपरस्तूदितो वर्तमानेऽध्वनि स्फुरति तावपि समाहितचित्ते-
न तुल्यावेकरूपालम्बनत्वेन सदृशावन्यथा तूभयत्रापि समा-
हितस्यैव चित्तस्यान्वयित्वेनावस्थानमेकाग्रतापरिणामः इत्युच्य-
ते ॥ चित्तपरिणामोक्तं रूपमन्यत्राप्यतिदिशन्नाह ॥ एतेन भूते-
न्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥ एतेन त्रिवि-
धोक्तेन चित्तपरिणामेन भूतेषु स्थूलसूक्ष्मेष्विन्द्रियेषु बहिरन्त-
करणभेदेनावस्थितेषु धर्मपरित्यागापादानवद्रूपधर्मान्तरस्वी-
कारो धर्मपरिणामः अध्वने लक्षणपरिणामो यथा तस्यैव घट-
स्यानागताध्वपरित्यागेन वर्तमानाध्वस्वीकारस्तत्परित्यागेन वा-
तीताध्वपरिग्रहः अवस्थापरिणामो यथा तस्यैव घटस्य प्रथम-
द्वितीययोः सदृशयोर्लक्षणयोरन्वयित्वेन यत्स्थलेशणाद्वे-
नापरिणममाने तत्र मध्याने तत्र कार्यधर्माणां धर्मरूपधर्मिणो ल-
क्षणमाह ॥ शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥ शान्ता ये
कृतस्वस्वव्यापारा अतीतेऽध्वन्यनुप्रविष्टाः उदिताः येऽनागतमध्वा-
नमध्वानं परित्यज्य स्वस्वव्यापारं कुर्वन्ति अव्यपदेश्या ये शक्तिरू-
पेण स्थिता अव्यपदेष्टुं न शक्यन्ते यथा सर्वं सर्वात्मकमित्येवमा-
दयो नियतकार्यकारणरूपतया योगत्रिविधमपि धर्माणां यो
ऽनुगतमनुवर्तनेनान्वयित्वेन स्वीकरोति स शान्तोदिताव्यपदेश्य-
धर्मानुपाती धर्मीत्युच्यते यथा सुवर्णं रुचकरूपपरित्यागे-
न स्वस्तिकरूपधर्मेण परित्यागग्रहे सुवर्णरूपतयानुवर्तमा-
नेनैव धर्मेषु कथञ्चिद्भिन्नेषु धर्मिरूपतया सामान्यात्मना धर्मि-
तया विशेषात्मनावस्थितमनुयायित्वेनावभासते ॥ एकस्य ध-
र्मिणः कथमनेके परिणामा इत्याशङ्कामपनेतुमाह ॥ क्रमा-
न्यत्वं परिणामान्यत्वे हेतुः ॥ धर्माणामनन्तलक्षणानां यः क्रमः
मृच्चूर्णानन्तरं पिण्डः ततः कपालानि तेभ्यश्च घट इत्येवंरूपप-
रिदृश्यमानः परिणामस्यान्यत्वमावेदयति तस्मिन्नेव धर्मि-
णि यो लक्षणपरिणामावस्थापरिणामयोः क्रमः स्यात्ते-

पा ता नं २८

15

एवंन्यायेन परिणामान्यत्वे गमकोऽनुगंतव्यः सर्व एव भावः प्रतिक्ष
णं परिणममाना दृश्यन्ते अतः सिद्धं क्रमान्यत्वात्परिणामान्यत्वम्
सर्वेषां विषयादीनां परिणममानानां केचिद्धर्माः प्रत्यक्षेणैवोप
लभ्यंते यथा सुखादयः संस्थानादयश्च केचिच्चैकान्तेनानुमानग
म्याः यथा धर्मसंस्कारशक्तिप्रभृतयः धर्मिणश्च भिन्नाभिन्नरूपतया
सर्वत्रानुगताः ॥ इदानीमुक्तस्य संयमस्य विषयप्रदर्शनद्वारेण
सिद्धीः प्रतिपादयितुमाह ॥ परिणामत्रयसंयमादतीतानाग
तज्ञानम् ॥ धर्मलक्षणावस्थाभेदेन यत्परिणामत्रयमुक्तं
तत्र संयमात्तस्मिन्विषये पूर्वोक्तसंयमस्य करणादतीतानागतज्ञा
नं योगिनः सम्यगाविर्भवति इदमत्र तात्पर्यम् अस्मिन्धर्मिण्ययं
धर्म इदं लक्षणमियमवस्था चानागतादध्वनः समेत्य वर्तमानेऽध्वनि
स्वव्यापारं विधायातीतमध्वानं प्रविशतीत्येवं परिज्ञातविक्षेपतया सं
यदा संयमं करोति तदा यत्किंचिदनुत्पन्नमतिक्रान्तं वा तत्सर्वं योगी
जानाति यतश्चित्तस्य शुद्धसत्वप्रकाशरूपत्वात्सर्वार्थग्रहणसा
मर्थ्यमविद्यादिभिर्विक्षेपैस्तन्नपरिह्रियते यदा तैस्तैरुपायैर्वि
क्षेपाः परिह्रियन्ते तदा निवृत्तमलस्येवादर्शस्य सर्वार्थग्रहणसा
मर्थ्यमेकाग्रताबलादाविर्भवति सिद्ध्यंतरमाह ॥ शब्दार्थप्रत्यया
नामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम्
शब्दः श्रोत्रेन्द्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थप्रतिपत्त्य
वच्छिन्नः यदि वाक्रमरहितः स्फोटात्मा शास्त्रसंस्कृतबुद्धिग्राह्यः उभ
यथापि पदरूपो वाक्यरूपश्च तयोरेकार्थप्रतिपत्तौ सामर्थ्यात् अर्थो जा
तिगुणक्रियादिः प्रत्ययो ज्ञानम् विषयाकारा बुद्धिवृत्तिः एषां श
ब्दार्थज्ञानानां व्यवहार इतरेतराध्यासात् भिन्नानामपि बुद्ध्येकरूपतासं
पादनात्संकीर्णत्वम् तथाहि गामानयेत्युक्ते कश्चिद्गोलक्षणमर्थं
गोत्वजात्यवच्छिन्नं सास्नादिमत्पिण्डरूपम् शब्दं च नादात्मकम् ज्ञा
नं च तद्ग्राहकमभेदेनैवाध्यवस्यति न त्वस्य गोशब्दो वाचकोऽयं गौ
र्वाच्यस्तयोरिदं ग्राहकं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं
वदति गौरिति सत्येकरूपतानयोः प्रतिपन्नस्मिन्स्थिते य इदं
शब्दस्य तत्वं यद्वाचकं नाम इदमर्थस्य तत्वं यद्वाच्यम् इदं ज्ञानस्य
तत्वं यत्प्रकाशकत्वमिति प्रविभागं विधाय तस्मिन्प्रविभागे यः
संयमं करोति तस्य सर्वेषां भूतानां पशुपक्षिसरीसृपादीनां यद्रु
तं यः शब्दस्तत्र ज्ञानमुत्पद्यते अनेनाभिप्रायेणानेनायं शब्दः सं

म्लयघेने ग्रन्थेनाभिप्रायेणैतेनाद्यमाह ॥ संस्कारसाक्षात्क
रणात्पूर्वजातिज्ञानम् द्विविधाश्चित्तस्य वासनारूपः संस्काराः
केचित्स्मृतिमात्रोत्पादनफलाः केचिज्जात्यायुर्भोगलक्षणवि
पाकहेतवः यथा धर्माधर्माख्याः तेषु संस्कारेषु यदा संयमं करो
ति एवं मया सोऽर्थोऽनुभूतः एवं सा क्रिया निष्पादितेति पूर्ववृ
त्तमनुसंदधानो भावनयैवावबोधकमन्तरेणोद्बुद्धसंस्कारः स
र्वमतीतं स्मरति क्रमेण साक्षात्कृतेषु संस्कारेषु पूर्वजन्
मानुभूतानपि जात्यादीन्प्रत्यक्षेण पश्यति ॥ सिद्ध्यन्तरमाह ॥
प्रत्ययस्य परचित्तज्ञानम् ॥ प्रत्ययस्य परचित्तस्य केनचिन्मु
खरागादिना लिङ्गेन गृहीतस्य यदा संयमं करोति तदा परकी
यस्य चित्तस्य ज्ञानमुत्पद्यते सरागमस्य चित्तं विरागं वेति परचि
त्तगतानपि धर्मान्जानातीत्यर्थः ॥ अस्यैव परचित्तस्य ज्ञान
स्य विशेषमाह ॥ न च तत्सालम्बनं तस्याविषयीभूतत्वात् ॥ तस्य
परस्य यच्चित्तं न सालम्बनं स्वकीयालम्बनेन सहितं न शक्य
ते ज्ञातुमालम्बनस्य केनचिल्लिङ्गेनाविषयीकृतत्वात् लिङ्गा
च्चित्तमात्रं परस्यावगतम् न तु नीलविषयमस्य चित्तं पीतविष
यमिति वा यच्च नाग्रहीतं न तत्र संयमस्य कर्तुमशक्यत्वान्न भव
ति परचित्तस्य यो विषयस्तत्र ज्ञानम् तस्मात्परकीयं चित्तं ना
लम्बनसहितं गृह्यते तस्यालम्बनस्यागृहीतत्वात् चित्तधर्मा
पुनर्गृह्यन्त एव यदा तु किमनेनालम्बितमिति प्रणिधानं कु
र्यात्तदा तत्संयमात्तद्विषयज्ञानमुत्पद्यत एव ॥ सिद्ध्यन्तरमा
ह ॥ कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगे
ऽन्तर्धानम् ॥ कायः शरीरं तस्य रूपं चक्षुर्ग्राह्यो गुणस्तस्मिन् अ
स्त्यस्मिन्काये रूपमिति संयमात्तस्य रूपस्य ग्रहणशक्तिनिब
न्धे वृत्तः चक्षुःप्रकाशासंयोगे चक्षुः प्रकाशः ज्ञानधर्मस्तस्यासं
योगेन तद्ग्रहणव्यापाराभावे योगिनोऽन्तर्धानं भवति न केनचि
द्दृश्यत इत्यर्थः एतेनैव त्वग्रूपाद्यन्तर्धानोपायप्रदर्शनेन
शब्दादीनां श्रोत्रादिग्राह्याणामन्तर्धानमुक्तं वेदितव्यम् ॥ सि
द्ध्यन्तरमाह ॥ सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञान
मरिष्टेभ्यो वा आयुर्विपाकं यत्पूर्वकृतं कर्म द्विप्रकारं सोपक्र
मं निरुपक्रमं च तत्र सोपक्रमं यत्फलजननायोपक्रमेण कार्य
कारणाभिमुख्येन सह वर्तते यथोष्णप्रदेशे प्रसारितमार्द्रवस्त्रं

पा
ता
जं
९

16

शीघ्रमेव शुष्यति उक्तरूपविपरीतं निरुपक्रमं यथा तदेवार्द्रवा
सः संवर्तितमनुष्णदेशे चिरेण शोषमेति तस्मिन्द्विविधे कर्म
णि शीघ्रविपाकं चिरविपाकमिति एवं ध्यानदार्ढ्यादपरान्तज्ञानम
स्योत्पद्यते अपरान्तः शरीरवियोगः तस्मिञ्ज्ञानममुष्मिन्काले
मुष्मिन्देशे मम शरीरवियोगो भविष्यतीति निःसंशयं जाना
ति अरिष्टेभ्यो वा अरिष्टानि त्रिविधानि आध्यात्मिकाधिभौति
काधिदैविकभेदेन तत्राध्यात्मिकानि पिहितकर्णः कोष्ठस्य वा
योर्घोषं न शृणोति इत्येवमादीनि आधिभौतिकानि अकस्माद्वि
कृतपुरुषदर्शनादीनि आधिदैविकानि अकाण्डएव द्रष्टु
मशक्यस्वर्गादिपदार्थदर्शनादीनि तेभ्यः शरीरवियोगः काले
न जानाति यद्यप्ययोगिनामप्यरिष्टेभ्यः प्रायेण ज्ञानमु
त्पद्यते तथापि तेषां सामान्याकारेण तत्संशयरूपम् ॥
योगिनां पुनर्नियतकालदेशतया प्रत्यक्षवदव्यभिचारि ॥ परि
कर्मनिष्पादितभूताः सिद्धीः प्रतिपादयितुमाह ॥ मैत्र्यादिषु
बलानि ॥ मैत्रीकरुणामुदितासु यो विहितः संयमस्तस्य
बलानि मैत्र्यादीनां संबन्धीनि प्रादुर्भवन्ति मैत्रीकरुणामु
दितास्तथास्य प्रकर्षं गच्छन्ति यथा सर्वस्य मित्रत्वादिकं संप्र
तिपद्यते ॥ सिद्ध्यन्तरमाह ॥ बलेषु हस्तिबलादीनि ॥ हस्त्या
दिसंबन्धिषु बलेषु कृतसंयमस्य तद्बलानि हस्त्यादिबलानि आ
विर्भवन्ति तदयमर्थः यस्मिन् हस्तिबले वायुवेगे सिंहवीर्ये
वा तन्मयीभावेन संयमं करोति तत्सर्वसामर्थ्ययुक्त
सत्त्वं तस्याविर्भवतीत्यर्थः पापशीलेषु उपेक्षा तस्या न भाव
ना तत उपेक्षायां नास्ति समाधिरिति अतो न बलमपेक्षातस्त
त्संयमाभावात् इति ॥ सिद्ध्यन्तरमाह ॥ प्रवृत्त्यालोकन्या
सात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥ प्रवृत्तिर्विषयवती
ज्योतिष्मती च प्रागुक्ता तस्या य आलोकः सात्त्विकः प्रका
शप्रसरः तस्य निखिलेषु विषयेषु न्यासात् तद्वासितानां वि
षयाणां भावनातः करणेन्द्रियेषु प्रकृष्टशक्तिमाप
न्नेषु सूक्ष्मस्य परमाण्वादेर्व्यवहितस्य भूम्यन्तर्गतस्य निधानादे :
र्विप्रकृष्टस्य मेर्वपरपार्श्ववर्तिनो रसायनादेर्ज्ञानमुत्पद्य
ते ॥ एतत्समानवृत्तान्तं सिद्ध्यन्तरमाह ॥ भुवनज्ञानं सूर्ये संयमा
त् ॥ सूर्ये प्रकाशमये यः संयमं करोति तस्य सप्तसु भूर्भुवः।

द्यः प्रभृतिषड्लोकेषु यानि भुवनानि तन्नमभ्यस्याभांसिग्राणि
तेषां लोके यथावद्ज्ञानमनुभूयते सूर्यस्मिन्कृते सांनिकप्र
काशालम्बनतयोक्तः इह तु भौतिक इति विशेषः भौतिक
प्रकाशालम्बनद्वारेणैव सिद्धान्तरमाह ॥ चन्द्रे ताराव्यूह
ज्ञानम् ॥ ताराणां ज्योतिषां यो व्यूहः विशेषः सन्निवेशः तं
स्मिन्चन्द्रे कृतसंयमस्य ज्ञानमुत्पद्यते सूर्यप्रकाशेन हततेज
स्कत्वात्ताराणां सूर्यसंयमात्तज्ज्ञानेन शक्तोति भवितुमिति पृ
थगुपायोभिहितः ॥ सिद्ध्यमाह ॥ ध्रुवे तद्गतिज्ञानम् ॥ ॥
ध्रुवे निश्चले ज्योतिषां प्रधाने कृतसंयमस्य ताराणां या
गतिः प्रत्येकं नियतकाला नियतदेशा च तस्या ज्ञानमुत्पद्यते इदं
तारा ग्रहं च इयता कालेनामुं राशिमिदं नक्षत्रं यास्यतीति सं
वेधमानानीतिश्चयात्मकः इदं कालं ज्ञानमस्य फलमित्युक्तं भवति
बाह्याः सिद्धीः प्रतिपाद्यान्तरीः प्रतिपादयितुमुपक्रमते ॥ नाभि
चक्रे कायव्यूहज्ञानम् ॥ शरीरवर्तिनाभिसंज्ञके यत्षोडशारं
चक्रं तस्मिन्कृतसंयमस्य योगिनः कायगतो यो सौ व्यूहः विशि
ष्टरसमलधातुनाडीनामवस्थानं तज्ज्ञानमुत्पद्यते इदमुक्तं
भवति नाभिचक्रं शरीरस्य मध्यवर्ति सर्वतः प्रसृतानां नाड्या
दीनां मूलभूतमतस्तत्र कृतावधानस्य सन्निवेशो यथावत् भवति
सिद्ध्यन्तरमाह ॥ कण्ठकूपे क्षुत्पिपासानिवृत्तिः कण्ठे गले
कूपः कण्ठकूपः जिह्वामूलाधस्तात्प्रदेशः प्राणादेर्यत्स्पर्शा
त्क्षुत्पिपासादयः प्रादुर्भवन्ति तस्मिन्कृतसंयमस्य योगिनः
क्षुत्पिपासादयो निवर्तन्ते घण्टिकाधस्तात्तन्तावमाधारणे तस्मिन्ना
वितते भवतेव विधा सिद्धः ॥ सिद्ध्यन्तरमाह ॥ कूर्मनाड्यां स्थैर्यम्
कूर्मं कूर्माख्या या नाडी हृदयात्कारमीसा प्राणत्रीनत्स्यांकृतसंयमस्य चे
तसः स्थैर्यमुत्पद्यते तत्स्थानमप्रविष्टस्येव सर्पस्य वेवलतानम
वलीन्थास्थैर्यः यद्वा कायस्थैर्यमुत्पद्यते न केनचित्स्पन्दयितुं शक्य
त इत्यर्थः ॥ सिद्ध्यन्तरमाह ॥ मूर्धज्योतिषि सिद्धदर्शनम् ॥
शिरःकपालेन्तर्ब्रह्मरन्ध्रे छिद्रं प्रकाशाधारत्वाज्ज्योतिः तथा
महादीपिनरूपस्य मणेः प्रसरन्ती प्रभा केन्द्रिका विवरप्रदेशे संघट्य
ते तथा हृदयस्थः सात्त्विकप्रकाशः प्रधानस्तत्रमपि पिण्डत्वेनभ
वते तत्र कृतसंयमस्य ये द्यावापृथिव्योरन्तरालवर्तिनः सि
द्धाः पुरुषा लक्ष्मीमितरप्राणिभिरदृश्यास्तान्पश्यतो भवति

पा ता नं. २

17

तैश्च सह संभाषणमित्यर्थः ॥ सर्वज्ञत्वे उपायान्तरमाह ॥ प्राति
भाद्वा सर्वं निमित्तानपेक्षम् मनोमात्रजन्म अविसंवादकं द्रागुत्प
द्यमानं ज्ञानं प्रतिभा तस्यां संयमे क्रियमाणे प्रातिभं वि
वेकख्यातेः पूर्वभावि तारकं ज्ञानमुदेति यथोदेष्यति सवि
तरि पूर्वं प्रभा प्रादुर्भवति तद्वद्विवेकख्यातेः पूर्वं तारकं सर्व-
विषयं ज्ञानमाविर्भवति तस्मिन्सति संयमान्तरं नापेक्षते सर्वं जा
नातीत्यर्थः ॥ सिद्ध्यन्तरमाह ॥ हृदये चित्तसंवित् हृदयं
शरीरस्य प्रदेशविशेषः तस्मिन्नधोमुखे स्वल्पपुण्डरीका-
भ्यन्तरे अन्तःकरणस्य स्थानम् तत्र कृतसंयमस्य स्वपरचित्तज्ञा
नमुत्पद्यते स्वचित्तगताः सर्वा वासनाः परचित्तगतांश्च
रागादीन् जानातीत्यर्थः ॥ सिद्ध्यन्तरमाह ॥ सत्त्वपुरुषयोर
त्यन्तासंकीर्णयोः प्रत्ययाविशेषाद्भोगः परार्थात्स्वार्थसंयमा
त्पुरुषज्ञानम् सत्त्वं प्रकाशसुखात्मकः प्राधानिकः परिणा
मविशेषः पुरुषो भोक्ताधिष्ठातृरूपः तयोर्भोग्यभोक्तृत्वचिद्रूप-
त्वेनस्मात्तत्त्वरूपाद्यात्यन्तासंकीर्णत्वम् भिन्नकमित्यर्थः त-
योः प्रत्ययस्याविशेषो भेदेनाप्रतिभासनम् तस्मात्सत्त्वस्यै-
वकर्तृताप्रत्यया सुखदुःखसंवित्सा भोगः सत्त्वस्य स्वार्थनै-
रपेक्ष्यात्परार्थः पुरुषार्थनिमित्तः तस्मादन्यो यः स्वार्थः पुरु-
षस्वरूपमात्रावलम्बनः परित्यक्ताहंकारे सत्त्वे या चिच्छायास-
क्रान्तिः तत्र कृतसंयमस्य पुरुषविषयं ज्ञानमुत्पद्यते तदेवं
रूपमालम्बनं ज्ञानं सत्त्वनिष्ठं पुरुषो जानाति न पुनः पुरुषो
ज्ञाता ज्ञानस्य विषयभावमापद्यते ज्ञेयतापत्तेः ज्ञातृज्ञेययो
श्चात्यन्तविरोधात् ॥ अस्यैव संयमस्य फलमाह ॥ ततः प्राति
भश्रावणवेदनादर्शास्वादवार्ता जायन्ते ॥ ततः पुरुषसंयमा
दभ्यस्यमानाद्व्युत्थितस्यापि ज्ञानानि जायन्ते तत्र प्रातिभे पूर्वो
क्ते ज्ञाने तस्याविर्भवत्सूक्ष्मादिकमर्थं पश्यति श्रावणं श्रोत्रे
न्द्रियजं ज्ञानम् तस्मात्प्रकृष्टाद्दिव्यं दिविभवं शब्दं जानाति
वेदनं स्पर्शनेन्द्रियजं ज्ञानं वेद्यतेऽनयेति कृत्वा तान्त्रिक्या सं
ज्ञया व्यवह्रियते तस्माद्दिव्यस्पर्शविषयं ज्ञानमुत्पद्यते आस्वा
दो रसनेन्द्रियजं ज्ञानम् आस्वाद्यतेऽनेनेति कृत्वा तस्मिन्प्रकृष्टे दि-
व्ये रसे संविदुत्पद्यते वार्ता गन्धसंवित् वृत्तिशब्देन ता-
न्त्रिकपरिभाषया वाच्यतः घ्राणेन्द्रियज्ञानात् वार्तागन्धसंवित् ः

तस्योपकृतघ्नमाणायोरिद्ध्यगयोनभूयते ॥ एवंफलविशेषा
णायोरिद्ध्यभागमाह ॥ तेसमाधावुपसर्गाव्युत्थानेसिद्धयः ॥
ते प्रातिभादयः फलविशेषाः समाधेः प्रकर्षं गच्छतः उप
सर्गा उपद्रवा विघ्नकारिणः तद्दर्शनविस्मयादिकारणेन समा
धिः शिथिलीभवति व्युत्थाने तु व्यवहारदशायां विशिष्टफलदा
यकत्वात्सिद्धयो भवन्ति ॥ सिद्ध्यन्तरमाह ॥ बन्धकारणशैथि
ल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ व्यापकत्वादात्मचित्त
योर्नियतकर्मवशादेव शरीरान्तर्गतयोर्बन्धः स्यात् तद्यदा स
माधिवशाद्बन्धकारणं धर्माधर्माख्यं कर्म शिथिलीभवति तानव
मापद्यते चित्तस्य योऽसौ प्रचारो हृदयप्रदेशादिन्द्रियद्वारेण विष
याभिमुख्येन प्रसरस्तं संवेदनेन जानन् इयं चित्तवहा नाडी अनया
चित्तं वहति इयं च रसप्राणादिवहाभ्यो नाडीभ्यो विलक्षणा इति स्वप
रशरीरयोर्यदा संचारं जानाति तदा परकीयं शरीरं मृतं जीवद्
वा चित्तसंचारद्वारेण शरीरे प्रविशति इन्द्रियाण्यनुप्रवर्तन्ते मधुकर
राजानमिव मधुमक्षिकाः ततः परशरीरप्रविष्टो योगी स्वशरी
रवत्तेन व्यवहरति यतो व्यापकयोश्चित्तपुरुषयोर्भोगसंको
चकारणं कर्माभूत्तच्चेत्समाधिना क्षिप्तम् तदा स्वातन्त्र्याद्भोग
निष्पत्तिः ॥ सिद्ध्यन्तरमाह ॥ उदानजयाज्जलपङ्ककण्टकादिष्व
सङ्ग उत्क्रान्तिश्च ॥ समस्तानामिन्द्रियाणां तुषज्वालावद्यु
गपद्युत्थिता वृत्तिः सा जीवनशब्दवाच्या तस्याः क्रियाभेदात्प्रा
णापानादिभिः संज्ञाभिर्व्यपदेशः तत्र हृदयान्मुखनासिकाद्वा
रेण वायोः प्रणयनात्प्राण इत्युच्यते नाभिप्रदेशात्पादाङ्गु
ष्ठपर्यन्तमपनयनादपानः नाभिप्रदेशं परिवेष्ट्य समन्तान्नय
नात्समानः कृकाटिकादेशादाशिरोवृत्तेरुन्नयनादुदानः
व्याप्य नयनात्सर्वशरीरव्यापी व्यानः उदानस्य संयमद्वारेण
जयादितरेषां वायूनां निरोधादूर्ध्वगामित्वेन जले महानद्यादौ म
हति कर्दमे वा तीक्ष्णेषु कण्टकेषु वा न सज्जते निषक्तत्वात् उपल
णवज्जलादौ मज्जतोऽप्युत्क्रान्तिरित्यर्थः ॥ सिद्ध्यन्तरमाह ॥ समा
नजयाज्ज्वलनम् अग्निमावेष्ट्य व्यवस्थितस्य समानाख्यस्य वायो
र्जयात्संयमेन वशीकारान्निरावरणस्याग्नेरुद्धतरमाह श्रोत्राका
शयोः संबन्धसंयमाद्दिव्यम् श्रोत्रम् आकाशं व्योम शब्दतन्मात्रकार्य
म् तयोः संबन्धो देशदेशिभावलक्षणः तस्मिन्कृतसंयमस्य

पा॰
ना॰
नं॰
१८

18

योगिनो दिव्यं श्रोत्रं प्रवर्त्तते युगपत्सूक्ष्मव्यवहितविप्रकृष्टशब्द-
ग्रहणसमर्थं भवतीत्यर्थः ॥ सिद्ध्यंतरमाह ॥ कायाकाश-
योः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥ का-
यः पांचभौतिकं शरीरं तस्याकाशेनावकाशदायकेन यः संबं-
धः तत्र संयमं विधाय लघुनि तूलादौ समापत्तिं तन्मयीभाव-
लक्षणां विधाय प्राप्तात्यंतलघुभावो प्रथमं भुवि यथारु-
चि संचरन् क्रमेणोर्णनाभितंतुजालेन संचरमाणः आदित्यर-
श्मिभिश्च विहरन्यथेष्टमाकाशेन गच्छति ॥ सिद्ध्यंतरमाह ॥ ब-
हिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥
शरीराद्बहिर्या मनसः शरीरनैरपेक्ष्येण वृत्तिः सा विदेहा नाम
विगतशरीराहंकारदार्ढ्यद्वारेणोच्यते ततस्तस्यां कृतसंय-
मात्प्रकाशावरणक्षयः सात्त्विकस्य चित्तस्य यः प्रकाशः तस्य य-
दावरणं क्लेशकर्मादि तत्क्षयः प्रविलयो भवति ॥ अयमर्-
थः शरीराहंकारे सति या मनोवृत्तिः सा कल्पितेत्युच्यते यदा
पुनः शरीराहंकारभावं परित्यज्य स्वातंत्र्येण मनोवृत्तिः सा-
ऽकल्पिता तस्यां संयमात्सर्वे चित्तमलाः क्षीयंते ॥ तदेवं पूर्वा-
न्तविषयाः परान्तविषया मध्यभवाश्च सिद्धीः प्रतिपाद्यान-
न्तरं भुवनज्ञानादिरूपा बाह्याः कायव्यूहज्ञानादिरूपा आभ्यंतराः
परिकर्मितः स्थूलरूपा मैत्र्यादिषु बलानीत्येवमाद्याः समाध-
्युपयोगिनीश्चांतःकरणबहिःकरणलक्षणेन्द्रियभवाः प्रा-
णादिभवाश्च सिद्धीश्चित्तदार्ढ्याय समाधौ समाश्वासोत्पत्तये
प्रतिपाद्येदानीं स्वदर्शनोपयोगिसबीजनिर्बीजसमाधिसिद्ध-
ये विविधोपायप्रदर्शनायाह ॥ स्थूलस्वरूपसूक्ष्मान्वयार्थ-
वत्त्वसंयमाद्भूतजयः ॥ पंचानां पृथिव्यादीनां ये पंचावस्थावि-
शेषरूपा धर्माः स्थूलत्वादयः तत्र कृतसंयमस्य भूतजयो भ-
वति भूतानि वश्यानि भवंतीत्यर्थः तथाहि भूतानां परिदृ-
श्यमानं विशिष्टाकारवद्रूपं स्थूलं स्वरूपं चैषां यथाक्रमं कार्यम् ॥
गंधस्नेहोष्णताप्रेरणावकाशदानलक्षणं सूक्ष्मं च यथाक्रम-
भूतानां कारणत्वेन व्यवस्थितानि तन्मात्राणि अन्वयिनो नस
प्रकाशप्रवृत्तिस्थितिरूपतया सर्वत्रैवान्वयित्वेन समुपलभ्यंते अ-
र्थवत्त्वं तेष्वेव गुणेषु भोगापवर्गसंपादनाख्या शक्तिः तदेवं भू-
तेषु पंचसु उक्तलक्षणावस्थाविशिष्टेषु प्रत्येकं संयमं कुर्वन्यो

गीभूतजयी भवति तद्यथा प्रथमं स्थूलरूपे संयमं विधाय तदनु
सूक्ष्मरूपे इत्येवं क्रमेण तस्य कृतसंयमे विधायिन्यो वत्समनुसारि-
ण्य इव गावो भूतप्रकृतयो भवति ॥ तस्यैवंभूतजयस्य फलमा-
ह ॥ ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥
अणिमा परमाणुरूपतापत्तिः लघिमा तूलपिण्डवल्लघुत्वप्राप्ति-
र्गरिमा गुरुत्वप्राप्तिः महिमा महत्त्वप्राप्तिः अंगुल्यग्रेण चन्द्रादिस्प-
र्शनशक्तिः प्राकाम्यमिच्छानभिघातः शरीरान्तःकरणेश्वरत्वमी-
शित्वम् सर्वत्र प्रभविष्णुत्वं वशित्वम् सर्वाणि भूतान्यनु-
गामित्वात् तद्वचनम् नातिक्रामन्ति यत्र कामावसायः यस्मिन्वि-
षयेऽस्य कामः इच्छा भवति तस्मिन्विषये योगिनोऽवसायो भव-
ति तं विषयं स्वीकारद्वारेणाभिलाषसमाप्तिपर्यन्तं नयतीत्यर्थः
एतेऽणिमाद्याः समाध्युपयोगिनो भूतजयाद्योगिनः प्रादुर्भव-
न्ति यथा परमाणुत्वमाप्तो वज्रादिकानीष्वन्तः प्रविशति ॥
एवं सर्वत्र योज्यम् त एतेऽणिमादयोऽष्टौ गुणा महासिद्धय इत्युच्य-
न्ते कायसंपद्वक्ष्यमाणा तां प्राप्नोति तद्धर्मानभिघातश्च तस्य का-
यस्य ये धर्मा रूपादयस्तेषामनभिघातो नाशो नास्ति नास्य रूपम-
ग्निर्दहति न वायुः शोषयतीत्यादि योज्यम् कायसंपदमाह रूपला-
वण्यबलवज्रसंहननत्वानि कायसंपत् रूपलावण्यबलानि प्रसि-
द्धानि वज्रसंहननत्वं वज्रवत्कठिना संहतिरस्य शरीरे भवतीत्यर्थ
इति कायस्याविर्भूतो गुणसंपत् ॥ एवं भूतजयमभिधाय प्रा-
प्तभूमिकसंयमस्येन्द्रियजयमाह ग्रहणस्वरूपास्मितान्वयार्थवत्त्व-
संयमादिन्द्रियजयः ॥ ग्रहणमिन्द्रियाणां विषयाभिमुखी वृत्तिः
स्वरूपं सामान्येन प्रकाशकत्वम् अस्मिताहंकारानुगमः अन्व-
यार्थवत्त्वे पूर्ववत् एतेषामिन्द्रियाणामवस्थापञ्चके पूर्ववत्सं-
यमं कृत्वेन्द्रियजयी भवति ॥ तस्य फलमाह ॥ ततो मनोजवि-
त्वं विकरणभावः प्रधानजयश्च ॥ शरीरस्य मनोवदनुत्तमग-
तिलाभो मनोजवित्वम् कायनिरपेक्षाणामिन्द्रियाणां वृत्ति-
लाभः विकरणभावः सर्ववशित्वं प्रधानजयः एताः सिद्धयो
जितेन्द्रियस्य प्रादुर्भवन्ति ताश्चास्मिंशास्त्रे मधुप्रतीका इत्यु-
च्यन्ते यथा मधुन एकदेशोऽपि स्वदते एवं प्रत्येकमेताः स्वदन्ते
इति मधुप्रतीकाः ॥ इन्द्रियजयमभिधायान्तःकरणजयमाह
सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञा-

पा॰ तं॰ १९ त्वं च ॥ निर्मलसात्त्विकपरिणामे कृतसंयमस्य या स
त्त्वपुरुषयोरुत्पद्यते विवेकख्यातिः गुणानां कर्तृत्वाभिमानशि
थिलीभावरूपा तन्माहात्म्यात्तत्रैव स्थितस्य योगिनः सर्वभावाधि
ष्ठातृत्वम् सर्वज्ञातृत्वं च समाधिर्भवति सर्वेषां गुणपरिणामा
नां भावानां स्वामिवदाक्रमणं सर्वभावाधिष्ठातृत्वम् तेषामेव शा
न्तोदिताव्यपदेश्यधर्मित्वेनावस्थितानां यथावद्विवेकज्ञानं सर्वज्ञा
त्वं सर्वज्ञातृत्वम् एषा चास्मिन् शास्त्रे परस्यां वशीकारसंज्ञायां प्राप्तायां
विशोका नाम सिद्धिरुच्यते ॥ क्रमेण भूमिकान्तरमाह ॥ ॥
तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥ यदास्यामपि विशोकायां
सिद्धौ वैराग्यमुत्पद्यते योगिनस्तदा तस्माद्दोषाणां रागादीनां
यद्बीजमविद्यादयः क्लेशाः तेषां निर्मूलने कैवल्यमात्यन्तिकी दुःख
निवृत्तिः पुरुषस्य गुणानामधिकारपरिसमाप्तौ स्वरूपप्रतिष्ठ
त्वम् ॥ अस्मिन्नेव समाधौ स्थिरत्वोपायमाह ॥ स्थान्युपनिमन्त्र
णे संगस्मयाकरणं पुनरनिष्टप्रसंगात् ॥ चत्वारो योगिनो भ
वन्ति तत्राभ्यासवान् प्रवृत्तमात्रज्योतिः प्रथमः ऋतंभरप्रज्ञो द्विती
यः भूतेन्द्रियजयी तृतीयः अतिक्रान्तभावनीयश्चतुर्थः तत्र च
तुर्थस्य समाधेः प्राप्तसप्तविधभूमिप्रज्ञत्वात् तस्य मधुमतीसंज्ञा भूमि
प्रत्यक्षा तस्य तन्मधुमतीसंज्ञां भूमिकां साक्षात्कुर्वतः स्थानिनो देवा उप
निमन्त्रयितारो भवन्ति दिव्यस्त्रीरसायनादिकमुपढौकयन्ति तस्मि
न्नुपनिमन्त्रणे तेन न संगः कर्तव्यो नापि स्मयः संगकरणे विष
यभोगप्रवृत्तिः स्मयकरणे कृतकृत्यमात्मानं मन्यमानो न समा
धावुत्सहते अतः संगस्मययोस्तेन वर्जनं मन्यमानेन मम ॥
अस्यामेव फलभूताया विवेकख्यातेः पूर्वोक्तसंयमव्यतिरिक्तमुपा
यान्तरमाह ॥ क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥ क्षणः स
र्वान्त्यः कलावयवः यस्य कलाः प्रविभक्तुं न शक्यन्ते तथाविधानां
कालक्षणानां यः क्रमः पौर्वापर्येण परिणामः तत्र संयमात्प्राग्
के विवेकजं ज्ञानमुत्पद्यते अयमर्थः अयं कालक्षणोऽमुष्मात्काल
क्षणादुत्तरोऽयमस्मात्पूर्वः इत्येवंविधे क्रमे कृतसंयमस्यात्यन्तसूक्ष्मे
पि क्षणक्रमे यदा भवति साक्षात्कारस्तदान्यदपि सूक्ष्मं महदादि सा
क्षात्करोतीति विवेकज्ञानोत्पत्तिः ॥ अस्यैव संयमस्य विषयविवेक
पयोगमाह ॥ जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः ॥
पदार्थानां भेदहेतवः जातिलक्षणदेशा भवन्ति क्वचिद्भेदहेतुर्जा

तिः जात्या गौरियं महिषीयमिति जात्या तुल्ययोर्लक्षणं भेदहेतुः
इयं कर्बुरा इयमरुणेति जात्या लक्षणेन चाभिन्नयोर्भेदहेतुर्देशो
दृष्टः यथा तुल्यपरिमाणयोरामलकयोर्भिन्नदेशावस्थितयोः
यत्र पुनर्भेदोऽवधारयितुन्न शक्यते यथैकदेशावस्थितयोः शुक्लयो
पार्थिवयोः परमाण्वोः तथाविधे विषये भेदाय कृतसंयमस्य य
स्य यदा भेदेन ज्ञानमुत्पद्यते तदुक्तं भवति येनैकेन विज्ञायते
भेदेनावधारयितुं शक्यः तत्संयमाद्भवत्येव भेदप्रतिपत्तिः ॥
सूक्ष्माणां तत्त्वानामर्थस्य विवेकजन्यज्ञानस्य संज्ञाविषयस्वाभा
व्यमाह तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं
उक्तसंयमादन्त्यायां भूमिकायामुत्पन्नं ज्ञानं तारयत्यगाधात्संसारसाग
राद्योगिनमित्यान्वर्थ्यसंज्ञया तारकमित्युच्यते अस्य विषयमा
ह सर्वविषयमिति सर्वाणि तत्त्वानि महदादीनि विषयोऽस्येति सर्ववि
षयमिति स्वभावश्चास्य सर्वथाविषयत्वात् सर्वाभिरवस्थाभिः ॥
स्थूलसूक्ष्मादिभेदेन तैस्तैः परिणामैः सर्वेण प्रकारेणावस्थितानि
तत्त्वानि विषयो यस्येति सर्वथाविषयम् स्वभावान्तरमाह निःश
षानः नावस्थापरिणामभव्यतादिकभावग्रहणे नास्य क्रमो विद्यत
इत्यक्रमम् सर्वं करतलामलकवद्युगपत्पश्यतीत्यर्थः ॥ अस्माद्वि
वेकजज्ञानात्किं भवतीत्याह ॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैव
ल्यम् सत्त्वपुरुषावुक्तलक्षणौ तयोः शुद्धिसाम्ये कैवल्यम् चि
त्तसत्त्वस्य सर्वकर्तृत्वाभिमाननिवृत्त्या स्वकारणेऽनुप्रवेशः स
त्त्वस्य शुद्धिः पुरुषस्य शुद्धिरुपचरितभोगाभावः इति द्वयोः समाना
यां शुद्धौ पुरुषस्य कैवल्यमुत्पद्यते मोक्षो भवतीत्यर्थः ॥ तदेवमंत
रंगं योगाङ्गत्रयमभिधाय तस्य संयमसंज्ञां कृत्वा संयमस्य च विष
यप्रदर्शनार्थं परिणामत्रयमुपपाद्य संयमबलोत्पद्यमानाः पूर्वा
न्तापरान्तमध्यभवाः सिद्धीरुपदर्श्य समाध्यभ्यासोत्पन्ने ये बाह्याभु
वनज्ञानादिरूपा आभ्यन्तराश्च कायव्यूहज्ञानादिरूपाः प्रदर्श्य स
माध्युपयोगाय इन्द्रियप्राणजयादिपूर्विकाः परमपुरुषार्थसिद्ध
ये यथाक्रममवस्थासहितभूतजयेन्द्रियजयसत्त्वजयोद्भवा व्या
ख्याय विवेकज्ञानोत्पत्तये तांस्तानुपायानुपन्यस्य तारकस्य सर्वसं
माध्यवस्थापर्यन्तभवस्य स्वरूपमभिधाय तत्समापत्तेः कृताधिकं
रस्य चित्तसत्त्वस्य कारणेऽनुप्रवेशात्कैवल्यमुत्पद्यत इत्यभिहित
मिति निर्णीतो विभूतिपादस्तृतीयः ॥ ॥ ॥ इति श्रीभो

पा जनानन्दविरचितायां पातञ्जलियोगशास्त्रे विभूतिपादस्तृतीयः ३॥
ना० ॥ ॐ यदुन्नत्यैव कैवल्यं विनोपायैः प्रजायते तमेकमजमीशा-
३ नं चिदानन्दमयं स्तुमः ॥ इदानीं विप्रतिपत्तिसमुत्थभ्रान्तिनिवा-
20 रणेनानुगुणं कैवल्यस्वरूपज्ञानाय कैवल्यपादोयमारभ्यते तत्र या
पूर्वमुक्ताः सिद्धयः तासां नानाविधजन्मादिकारणप्रतिपादनद्वा-
रेणैवं बोधयति यदेताः सिद्धयः पूर्वजन्माभ्यस्तसमाधिबलाज्ज-
न्मादिनिमित्तमात्रत्वेनाश्रित्य प्रवर्तन्ते ॥ तत्रानेकभवसाध्य-
स्य समाधेर्न हानिरस्तीत्याश्वासोत्पादनाय समाधिसिद्धेश्चाधा-
नायोपत्तार्थं कैवल्योपयोगार्थं चाह जन्मौषधिमन्त्रतपः समा-
धिजाः सिद्धयः काश्चन जन्मनिमित्ता एव सिद्धयः यथा पक्ष्यादी-
नामाकाशगमनादयः सांसिद्धिका गुणाः औषधिसिद्धयो यथा
पारदादिरसायनाद्युपयोगात् मन्त्रसिद्धिर्यथा मन्त्रजपादाका-
शगमनादि तपःसिद्धिर्यथा विश्वामित्रादीनां समाधिर्यथा
प्राक्प्रतिपादिता एताः सिद्धयः पूर्वजन्मनि क्षपितकल्मषा-
णामेवोपजायते तस्मात्समाधिसिद्धिविवात्यासां सिद्धीनां समाधि-
रेव जन्मान्तराभ्यस्तः कारणम् मन्त्रादीनि निमित्तमात्राणि ॥ नन्व
नन्दीश्वरादीनां जात्यादिपरिणामोऽस्मिन्नेव जन्मनि नहुषादीनां जा-
त्यादिपरिणामोऽस्मिन्नेव न कारणत्वमभ्यासेनेत्याशङ्क्याह जात्य-
न्तरपरिणामः प्रकृत्यापूरात् पाश्चात्यापवहिप्रकृतयोऽस्मि-
न्जन्मनि विकारानापूरयन्ति जात्यन्तराकारेण परिणमयन्ति ॥
ननु धर्मादयस्तत्र क्रियमाणा उपलभ्यन्ते तत्कार्यं प्रकृतीनामापू-
रणे कारणत्वमित्याशंक्याह निमित्तमप्रयोजकं प्रकृतीनां वरण-
भेदस्तु ततः क्षेत्रिकवत् निमित्तं धर्मादि तत्प्रकृतीनामर्थान्तर-
परिणामे न प्रयोजकं न हि कार्येण कारणं प्रवर्त्यते कुत्र तर्हि
धर्मस्य व्यापार इत्याह वरणभेदस्तु ततः क्षेत्रिकवत् ततस्तस्मात्
नुष्ठीयमानाद्धर्माद्वरणमावरकमधर्मादि तस्यैव विरोधि-
त्वाद्भेदः क्षयः क्रियते तस्मिन्प्रतिबन्धके क्षीणे प्रकृतयः स्वयमभि-
मतकार्याय प्रभवन्ति दृष्टान्तमाह क्षेत्रिकवत् यथा क्षे-
त्रिकः कृषीवलः केदारभेदमात्रं करोति तस्मिन्भिन्ने जलं स्व-
यमेव प्रसरद्रूपं परिणामं गृह्णाति न तु जलप्रसरणे तस्य कश्चि-
त्प्रयासः एवं धर्मादेर्बोद्धव्यम् ॥ यदा साक्षात्कृततत्त्वस्य योगिनो
युगपत्कर्मफलभोगायात्मीयनिर्मायाविभूत्यनुभवायु-

गपदनेकशरीरनिर्मित्सोपजायते तदा कुतस्तानि चित्तानि प्र-
भवंतीत्याह निर्माणचित्तान्यस्मितामात्रम् योगिनः स्वयं नि-
र्मितेषु कायेषु यानि चित्तानि तानि मूलकारणादस्मितामा-
त्रादेव तदिच्छया प्रसरंति अग्नेर्विस्फुलिंगा इव युगपत्परिणम-
न्ति ॥ ननु बहूनां चित्तानां भिन्नाभिप्रायत्वान्नैककार्यकर्तृत्वं स्या-
दित्यत आह प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् तेषां
प्रवृत्तिभेदे व्यापारनानात्वे एकं योगिनचित्तं प्रयोजकं प्रेरकम-
धिष्ठातृत्वेन तेन भिन्नमतत्वम् अयमर्थः यथात्मीये शरीरे म-
नश्चक्षुः पाण्यादीनि यथेच्छं प्रेरयति अधिष्ठातृत्वेन तथा का-
यांतरेष्वपि इति जन्मादिप्रभवत्वात्सिद्धीनां चित्तमपि तत्प्रभवं पं-
चविधमेव ॥ ततो जन्मादिप्रभवाच्चित्तात्समाधिचित्तस्य
वैलक्षण्यमाह तत्र ध्यानजमनाशयम् ध्यानजं समाधिजं
यच्चित्तं तत्पंचस्व मध्ये नाशयम् सर्ववासनारहितमित्यर्थः ॥
यथेतरचित्तेभ्यो योगिनश्चित्तं क्लेशादिरहितं विलक्षणं तथा क-
र्मापि विलक्षणमित्याह कर्माशुक्लाकृष्णयोगागारि शुक्लं ॥ अ-
शुभफलं कृष्णम् तत्र शुक्लं कर्म विचक्षणानां दानतपःस्वाध्या-
यवतां मनुष्याणाम् योगिनां तु संन्यस्तानामेव विपक्वकर्मवि-
लक्षणम् यत्फलत्यागान सर्वेषामेवेनैनान्न किंचित्फलमा-
रभते ॥ अस्यैव कर्मणः फलमाह ततस्तद्विपाकानुगुणाना-
मेवाभिव्यक्तिर्वासनानाम् द्विविधाः कर्मवासनाः स्मृतिमात्र-
फलाः जात्यायुर्भोगफलाश्च तत्र जात्यायुर्भोगफला एकानेक-
जन्मभवा इत्यनेन पूर्वमेवोक्तनिर्णयाः याः स्मृतिमात्रफला-
स्तासामभिव्यक्तिस्ततः कर्मणो येन कर्मणा यादृक्शरीरमार-
ब्धं देवमनुष्यतिर्यगादिभेदेन तस्य विपाकस्य या अनुगुणा अनु-
रूपा वासनास्तासामेव तस्मादभिव्यक्तिर्वासनानां भवति अयम-
र्थः येन कर्मणा पूर्वं यादृग्देवतादिशरीरमारब्धं जात्यन्तरशतव्यव-
धानेन पुनस्तथाविधस्यैव शरीरस्यारंभे तदनुरूपा एव स्मृतिफल-
वासनाः प्रकटीभवंति लोकान्तरेष्वेवार्थेषु तस्य स्मृत्यादयो जा-
यंते इतरास्तु सत्योऽप्यव्यक्तसंज्ञास्तिष्ठंति न तस्यां दशायां नार-
कादिशरीरोपभोगभवा वासना व्यक्तिमायांति आसां वासनानां का-
र्यकारणभावानुपपत्तिमाशंक्य समर्थयितुमाह जातिदेश-
कालव्यवहितानामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥

पा इह नानायोनिषु भ्रमतां संसारिणां कांचिद्योनिमनुभूय यदा योन्य
नी न्तरसहस्रव्यवधानेन पुनस्तामेव योनिं प्रतिपद्यते तदा तस्यां पूर्वानु
२१ भूतायां योनौ तथाविधशरीरादिव्यंजकापेक्षया वासना या
प्रकटीकृता आसन् तास्तथाविधव्यंजकाभावात्तिरोहिता
पुनस्तथाविधं व्यंजकशरीरादिलाभे प्रकटीभवंति जातिका
लदेशव्यवधानेऽपि तासां स्वानुरूपस्मृत्यादिफलसाधने आनंत
र्यं नैरंतर्यमेव कुतः स्मृतिसंस्कारयोरेकरूपत्वात् तथाहि अनु
ष्ठीयमानात्कर्मणश्चित्तसत्त्वे वासनारूपः संस्कारः समुत्पद्यते
स च स्वर्गनरकादीनां फलानामंकुरीभावः कर्मणां वा यागादीनां
शक्तिरूपतयावस्थानं वा कर्तुर्वा तथाविधभोग्यभोक्तृत्वरूपं साम
र्थ्यम् ततः संस्कारात्स्मृतिः स्मृतेश्च सुखदुःखोपभोगः ततस्तदनु
भवाच्च पुनरपि संस्कारस्मृत्यादयः एवं यस्य स्मृतिसंस्कारा
दयो भिन्नाः तस्यानंतर्याभावे दुर्लभः कार्यकारणभावः अस्मा
कं तु यदानुभव एव संस्कारीभवति संस्कारश्च स्मृतिरूपतया
परिणमते तदैकस्यैव चित्तस्यानुसंधातृत्वेन स्थितत्वात्कार्य
कारणभावो न दुर्घटः भवत्वानंतर्यं कार्यकारणभावस्तु वासनानां
यदा तु प्रथममेवानुभवः प्रवर्तते तदा किंवासनानिमित्तक उ
त निर्निमित्तक इति शंकामपनेतुमाह तासामनादित्वमाशि
षो नित्यत्वात् तासां वासनानामनादित्वं न विद्यते आदिर्यस्य त
स्य भावस्तत्त्वम् आसामादिर्नास्तीत्यर्थः कुत इत्यत आह आशिषो
नित्यत्वात् योयमाशीर्महामोहरूपा सनैव वियोगो मम भूदिति सं
कल्पविशेषो वासनानां कारणम् तस्य निसर्गसिद्धत्वादनुभ
वसंस्कारादीनां या प्रवृत्तिः केन कार्यते अनुभवसंस्काराद्य
नुविद्धं संकोचविकासधर्मि चित्तं तत्तदभिव्यंजकविपाकला
भात्तत्तत्फलरूपतया परिणमते इत्यर्थः आसामानंत्यात् हानं क
थं भवतीत्याशंक्य हानोपायमाह हेतुफलाश्रयालंबनैः ॥
संगृहीतत्वादेषामभावे तदभावः ॥ वासनानामनंतरानुभ
वो हेतुः तस्यानुभवस्य रागादयः तेषामविद्येति साक्षात्पार
म्पर्येण हेतुः फलं शरीरादि स्मृत्यादि च आश्रयो बुद्धिस
त्त्वमालंबनं यदेवैरनंतानामपि वासनानां संगृहीतत्वात्ते
षां हेत्वादीनामभावे ज्ञानयोगाभ्यां दग्धबीजत्वे विहिते निर्मू
लत्वान्न वासनाः प्ररोहंति न कार्यमारभंत इति तासामभावः ॥

ननु प्रतिक्षणं चित्तस्य नश्वरत्वोपलब्धवासनानां तत्फलानां च का
र्यकारणभावेन युगपदभावित्वात् भेदे कथमेकत्वमित्याशंक्यै
कत्वसमर्थनायाह अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणा
म्॥ इहात्यन्तमसतां भावानामुत्पत्तिर्न युक्तिमती तेषां सत्त्व
सम्बन्धायोगात् न हि शशविषाणादीनां क्वचिदपि सत्त्वसं
बंधो दृष्टः निरुपाख्ये च कार्ये किमुद्दिश्य कारणानि प्रवर्तेरन् न
हि विषयमनालोच्य कश्चित्प्रवर्तते सतामपि विरोधान्नाभावस
म्बंधोऽस्ति यत्स्वरूपेणालब्धसत्ताकं न तत्कथं निरुपाख्यतामभा
वात्मभवादसतां चोत्पत्त्यसंभवात्तेषु धर्मेषु विपरिणममानो धर्मी
सदैकरूपतयावतिष्ठते धर्मास्त्वध्वभेदेन त्रैकालिकत्वेन व्य
वस्थिताः स्वस्मिन्स्वस्मिन्नध्वनि व्यवस्थिता न स्वरूपं त्यजन्ति वर्तमा
नेऽध्वनि व्यवस्थिताः केवलं भोग्यतां भजन्ते तस्मादपवर्गपर्यन्त
मेकमेकं चित्तं धर्मितयानुवर्तमानं न निह्नोतुं पार्यते॥ अत एते
धर्मधर्मिणः किंरूपा इत्यत आह ते व्यक्तसूक्ष्मा गुणात्मानः॥
य एते धर्मधर्मिणः प्रोक्तास्ते व्यक्तसूक्ष्मभेदेन व्यवस्थिता ये गुणाः
सत्त्वरजस्तमोरूपास्तदात्मानस्तत्स्वभावास्तत्परिणामरूपा
इत्यर्थः यतः सत्त्वरजस्तमोभिः सुखदुःखमोहरूपैः सर्वो बा
ह्याभ्यन्तरभेदभिन्नानां भावव्यक्तीनामन्वयानुगमो दृष्टस्तेन यद
न्वितं तत्परिणामरूपं दृष्टम् यथा च घटादयो मृदन्विता मृत्प
रिणामरूपाः॥ यद्येते त्रयो गुणाः सर्वत्र मूलकारणं कथ
मेको धर्मीति व्यपदेश इत्याशंक्याह परिणामैकत्वाद्वस्तुतत्त्वं॥
यद्यपि त्रयो गुणास्तथापि तेषामङ्गाङ्गिभावलक्षणः परिणा
मः क्वचित्सत्त्वमङ्गि क्वचिद्रजः क्वचित्तम इत्येकरूपस्यैकत्वाद्व
स्तुनस्तत्त्वमुच्यते यथाऽयं पृथिवी अयं वायुरित्यादि ननु च ज्ञा
नव्यतिरिक्ते सत्यर्थे वस्त्वेकमनेकं वा वक्तुं युज्यते इदानीं विज्ञानमे
व वासनावशात्कार्यकारणभावेनावस्थितं तथा तथा प्रतिभाति
तदा कथमेतच्छक्यते वक्तुमित्याशङ्क्याह वस्तुसाम्ये चित्तभेदात्त
योर्विभक्तः पन्थाः॥ तयोर्ज्ञानार्थयोर्विभक्तः पन्थाः विविक्तो मा
र्ग इति यावत् कथं वस्तुसाम्ये चित्तभेदात् समाने वस्तुनि स्त्र्यादा
वुपलभ्यमाने नानाप्रमातॄणां चित्तस्य भेदः सुखदुःखमोहरू
पतया समुपलभ्यते तथाह्येकस्यां रूपलावण्यवत्यां योषितु
पलभ्यते तथाह्येकस्यां रूपलावण्यवत्यां योषित्युपलभ्यते सपत्न्यादेः॥

पा
तो॰
११

त्वेदेषः परिज्ञानकालेर्थेण रूपैकस्मिन्नपि च वस्तुनि नानावि
धविरोधदर्शनं कथं चित्कार्यत्वे वस्तुनो यदीयस्य चित्स्वत
हेतुकार्यम् तस्मिन्नर्थान्तराभासेऽचित्स्यात् किंचित्स्यात् ॥
भवति निवेष्य तदेव कथमन्यवेद्यमभिन्नप्रलभ्येत उपलभ्यते
चेत्तस्मात्तु चित्कार्यम् ग्रन्थग्रन्थपदार्थैः सोऽर्थः क्रियते यदा
वस्तु निर्मितिधार्मस्यैकनिर्मितादेव लक्षणं स्यात् यदि वैलक्षण्यं
नेष्यते तदा कारणभेदस्य न कार्यभेदस्याभवतीति तदेकमेक
रूपं वा जगत्स्यात् पतदूर्ध्वं भवति सत्यपि भिन्नकारणे यदि का
र्याभेदस्तदा समग्रस्य जगतो नानाविधकारणजन्यमेकरूपं स्यात्
कारणभेदात् न तु गमात् स्थाने योनि हेतुकं स्यात् यथैवं कथ्यते
नं त्रिगुणात्मनार्थेनैकस्यैव प्रसाः सुखदुःखमोहमयानि ता
नानि जन्यन्ते नैवम् यथार्थे विभिन्नत्वाचित्तमपि त्रिगुणम् ॥
तस्यार्थापि प्रतिभासात्मनो धर्मो धर्माद्यः महाकारिकारण
नद्भवाभिभववशात्कादाचित्कात्स्यात्तेन तद्रूपेणाभिव्यक्तिः
तथा च कामकस्य सत्त्वविहितायां योषिति धर्मसहकृतेन चित्तस
त्त्वस्यांशेन या परिणममाने सत्त्वमयं भवति तदेवाधर्मसह
कारिरजसांशेन तया दुःखरूपं सपत्नीमात्रस्य भवति तीव्राध
र्मसहकृतमयं भवति तस्माद्वित्तान्न व्यतिरिक्तोस्ति बाह्योऽर्थः
नेदं वित्तानवस्तुनो स्वादात्म्यविरोधात्त्र कार्यकारणभावः
कारणभेदे सत्यपि कार्याभेदे निप्रसंगादिदितित्तानाद्यानि विज्ञ
त्वमर्थस्य च व्यवस्थापितम् यद्येवं ज्ञानेऽचेतनस्वप्रकाशत्वाद्ग्रहण
स्वभावम् अर्थं स्वप्रकाश्यत्वाद्गृह्यस्वभावस्तत्कथं ग्रहणसा
वीनर्थान्नगृह्णाति न च स्मरतीत्याशंक्यापरिहारं वक्तुमाह ॥
तद्यगाभासे यदि त्वा वितस्य वस्तु तानमतानेव वभति अप
सर्पः सर्वः पादार्थग्राही ह्यात्मलाभे सामग्रीमपेक्षते नीला
दिज्ञानं चोपजायमानमिन्द्रियप्रणालिकया समानमर्थोपरा
गमहकारिकारणत्वेनापेक्षते व्यतिरिक्तस्यार्थस्य समयाभा
वाद्गृहीनमपाकयत्वात् ततस्तेनैवस्वहारयोग्यतां नयति तत
वमोर्थो ज्ञानं तस्त्वच्चाने यदाकारेण समर्प्यते: सौत्रान्तिकनय
वहितयत् सकारिकारणत्वं प्रतिपद्यते तस्मित्रवाह्यस्मृतिन
कश्चिद्विरोधः ॥ यद्येवं प्रमातापि पूर्वग्राह्यस्मिन्काले नीलं
वेदयति तत्तस्मिन्नेव पौर्वाह्णस्मन्काले नीलेन वस्त्वादि वि

त्कग्रहीतस्वरूपत्वाद्याकारग्रहणे परिणामित्वं प्राप्तमित्याश
ङ्कां परिहर्तुमाह सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्याप
रिणामात् याश्चेतावित्तस्य प्रमाणविपर्ययादिरूपा वृत्तयः ता
स्तत्प्रभोस्तत्स्वामिनस्य ग्रहीतुः पुरुषस्य सदा सर्वकालमेव ज्ञेया
तस्याचिद्रूपतया परिणामान्परिणामित्वाभावात् इत्यर्थः
यद्यसौ परिणामी स्यात्तदा परिणामस्य कादाचित्कत्वात्तासां
चित्तवृत्तीनां सदा ज्ञातत्वं नोपपद्यते अयमर्थः पुरुषस्य चिद्रू
पस्य सर्वदैवाधिष्ठातृत्वेन व्यवस्थितस्य यदान्तरङ्गं निर्मलं
सत्वं तस्यापि सदैवावस्थितत्वात् येनार्थेनोपरक्तं भवति तथा
विधस्यार्थस्य सदैव चिच्छायासङ्क्रान्तिसद्भावात् तस्यां
सत्यां सिद्धं ज्ञातत्वमिति न कदाचित्परिणामित्वाशङ्का ॥ न
नु चित्तमेव सत्वोत्कर्षाद्यदि प्रकाशकं स्वपरप्रकाशकत्वा
दात्मानमर्थं च प्रकाशयतीति तावतैव व्यवहारसमाप्तेः कृ
तं ग्रहीत्रन्तरेणेत्याशङ्कामपनेतुमाह न तत्स्वाभासं दृश्य
त्वात् तच्चित्तं स्वाभासं स्वप्रकाशकं न भवति पुरुषवेद्यं
भवतीति यावत् कुतो दृश्यत्वात् यत्किल दृश्यं तद्द्रष्टृवेद्यं
दृष्टम् यथा घटादि दृश्यं च चित्तं तस्मान्न स्वाभासम् ननु साध्या
विशिष्टोऽयं हेतुः दृश्यत्वमेव चित्तस्यासिद्धम् किं च स्वबुद्धि
संवेदनद्वारेण पुरुषाणां हिताहितप्राप्तिपरिहाररूपाश्चेतो
दृश्यते तथा हि क्रुद्धोऽहं भीतोऽहमत्र मे रागः इत्येवमाद्याः
संविदो बुद्धेः संवेदनेनोपपद्यन्ते इत्याशङ्कां निरसितुमाह एक
समये चोभयानवधारणम् अर्थस्य संवित्तिरिदंतया व्यवहार
योग्यतापादनम् अयमर्थः सुखदुःखरूपमेवेति बुद्धेश्च संवि
दहमित्येवमाकारेण सुखदुःखरूपतया व्यवहारक्षमतापादने
एवंविधं च व्यापारद्वयमेकस्मिन्नेव काले न युगपत्कर्तुं शक्यम् वि
रोधात् न हि विरुद्धयोर्व्यापारयोर्युगपत्सम्भवोऽस्ति अत एक
स्मिन्काले उभयस्य स्वरूपस्य चावधारयितुमशक्यत्वात् न चित्तं स्व
प्रकाशकं भवति इत्युक्तं भवति किं च एवंविधव्यापारद्वयाप
त्मकस्य संवेदना हि मे स्वरूपेणार्थो निश्चितत्वेन चित्तस्य स्वसंवेदना
द्धि हि संदर्शने निश्चयमेव फलेन त्वनिश्चितमित्यर्थः ॥ ननु मा भूद्बुद्धे
स्वयं ग्रहणे बुद्ध्यन्तरेण भविष्यतीत्याशङ्क्याह चित्तान्तरदृश्ये बुद्धे
रतिप्रसङ्गः स्मृतिसंकरश्च यदि हि बुद्धिर्बुद्ध्यन्तरेण वेद्यते

पा॰
ता॰
२२

तदाभासापि बुद्धिः स्वयमवेद्या वेद्यान्तरेण वेद्या प्रयत्नसमर्थेत
तस्य ग्राहकं बुद्ध्यन्तरं कल्पनीयम् तस्याप्यप्रत्यक्षत्वेनवस्था
नान्नप्रथायामप्रत्यक्षायामर्थप्रतीतिर्नस्यात् नहि प्रतीतावप्रती
तायामर्थः प्रतीतो भवति स्मृतिसंकरश्च प्राप्नोति रूपरस
वासनन्त्राप्यवबोधानन्तग्राहिकानामनंतानां बुद्धीनां समुत्पत्तेः
तज्जनितैः संस्कारैः यदा युगपद्बह्व्यः स्मृतयः क्रियन्ते त
दार्थवेदः पर्यवसानाद्धि स्मृतीनां युगपदुत्पत्तेः कस्मिं
श्चेयं स्मृतिरिति प्रज्ञत्वेन निश्चेतुमशक्यत्वात् स्मृतीनां संकरः
स्यादियं रूपस्मृतिरियं रसस्मृतिरिति न ज्ञायेत ननु च बौद्धैः स्व
प्रकाशाभावेन वृत्तेरेणवासंवेदने दृष्टो व्यवहारः साधा
के स्वसिद्धान्तमाह चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्व
बुद्धिसंवेदनम् पुरुषस्वरूपभावाचितिः साप्रतिसंक्रमा न वि
षयेष्प्रतिसंक्रामो मन्त्रगपते यस्याः सा न दोक्ता यन्नेनासंकी
र्णेति यावत् यथा गुणा अङ्गाङ्गिभावलक्षणे परिणामे अङ्गिनं गु
णमनुपसंक्रामन्ति तद्रूपतामिवापद्यन्ते यथा वा लोके परमा
णवः प्रसरन्तो विषयमाद्रूपयन्ति नैवाक्षितिशक्तिः तस्याः स
बैस्कद्रूपतया प्रतिष्ठिते नाच विक्षाप्तिबुद्धिवृत्तेनावतिष्ठत
या संवेद्यते तदा स्वबुद्धिः स्वस्यात्मनः संवेदने भवतीत्यर्थः
॥ इत्थं संविदितं चित्तं सर्वार्थग्रहणसामर्थ्येन सकलव्यवहा
रनिर्वाहक्षमं भवतीत्याह द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्
द्रष्टा पुरुषस्तेनोपरक्तं तत्सन्निधानेन तद्रूपतामिव प्राप्तं दृश्यो
परक्तं गृहीतविषयाकारपरिणामं यदा भवति तदा तदेव सर्वा
र्थग्रहणसमर्थं जायते यथा निर्मले स्फटिकदर्पणाद्येव प्रति
बिम्बग्रहणसमर्थम् एवं रजस्तमोभ्यामनभिभूतं सत्वं शुद्ध
त्वाच्चिच्छायाग्रहणसमर्थं भवति न पुनरशुद्धत्वाद्रज
स्तमसी तदाभूतरजस्तमोरूपमंगितया सत्वं निश्चलदीप
शिखाकारं सदैवैकरूपतया परिणममानं चिच्छायाग्रहण
सामर्थ्यदामोक्षप्राप्तेरवतिष्ठते यथा यस्कान्तसन्निधाने लोहाभि
व्यञ्जनेप्येवं सत्वसान्निध्यादाने सत्वस्याभिव्यंग्यमभिव्यज्यते चैतन्यमत
एवास्मिन्दर्शने द्वे चिच्छक्ती नित्योदिताभिव्यंग्या च नित्योदि
ता चिच्छक्तिः पुरुष तत्सन्निधानादभिव्यक्तचैतन्यं सत्वमभिव्यं
ग्या चिच्छक्तिः तद्यत्सन्निहितत्वादन्तरङ्गं पुरुषस्य भोग्यतां प्र

निष्पद्यते तदेवदर्शनंतच्चलक्षणादिभिः सोऽयं पुरुषस्यपरमात्मनोधि
ष्ठेयंकर्मान्तरूपेणस्वरूपः स्वमोक्तृतयाध्यवसीयते यतस्तेनान्तःक्षि
प्तात्एकस्यापिगुणस्यकदाचित्कस्य चिदंशेनात्रिगुणप्रतिबि
म्बपरिणममानेस्वरूपःस्वमोहात्मकमतिनिर्मलम् ततस्तस्मिन्कर्मा
न्तरूपेणसुदृढमतिस्वकारणसमर्पणद्वारेणसैवप्रतामापादयति
तच्छमाणेचित्वमेकतः प्रतिसंक्रान्तचिच्छायामन्यतोगृहीतवि
षयाकारेणचित्तेनोपश्लेषितस्साकारचित्तसंक्रान्तिबलाच्चेतना
यमानेवात्मवचैतन्याभावेपिस्वरूपः स्वरूपंभोगमनुभवति॥
सएवभोगोत्यंतसान्निध्येनविवेकाग्रहणाद्भोक्तरिपुरुषस्य
भोगइत्यभ्युपदिश्यते अनेनैवाभिप्रायेणविन्ध्यवासिनोक्तम्
सत्वतप्यमेवपुरुषस्यतप्यत्वमिति अन्यत्रापिप्रतिबिम्बमानच्छा
यासादृश्यमात्रच्छायान्तरोदयः प्रतिबिम्बशब्देनोच्यते एवंसत्व
पिपौरुषेयच्छायासादृश्यस्वकायविच्छायान्तराभिव्यक्तिःप्रति
बिम्बशब्दार्थः ननुप्रतिबिम्बमानिलघुनियतपरिमाणस्यनिर्म
लेनियतपरिमाणेचमध्यस्थमतःप्रविष्टत्वमेवनिर्मले ष्टंयथा
मुखस्यदर्पणेअतत्विनिर्मलस्यव्यापकस्यचपुरुषस्य तस्मादनि
र्मलेसत्वेकथंप्रतिबिम्बनमुपपद्यते उच्यतेप्रतिबिम्बनस्वरूप
मनवगच्छताभवतेदमभ्यधायिपेवसत्वगतायाअभिव्यंग्यायाः
चिच्छक्तेः पुरुषस्यसान्निध्येभिव्यक्तिरेवप्रतिबिम्बनमुच्यते
यादृशीपुरुषगताचिच्छायातिलच्छायात्राविर्भवति यदप्युक्त
मतेननिर्मलः पुरुषः कथमनिर्मलेसत्वेप्रतिसंक्रामतीति तदप्य
प्यनैकान्तिकम् नैर्मल्यादपकृष्टेपिजलादावादित्यादयः प्र
तिसंक्रान्ताःसमुपलभ्यंते यदप्यक्रमतवच्छिन्नस्यनास्तिप्रति
संक्रान्तिरितितदप्यनुपपन्नम् व्यापकस्याप्याकाशस्यदर्पणा
मनुरूपेणोद्धतत्वेपुरुषसन्निधानादभिव्यंग्यायाश्चिच्छक्तेर्बोद्ध
र्थाकारणसंक्रान्तापुरुषस्यस्वरूपः स्वभोगइत्युक्तम् तदनुपप
न्नम् तदेवचितसत्वप्रकृतायाःकथंभवति किमर्थंचतस्याः
परिणामः उच्यते पुरुषस्यार्थंभोगसंपादनकर्तव्यम् प्रत
पुरुषार्थकर्तव्यतायानसत्वगुणस्यैवपरिणामः तदेवमपवर्ग
पुरुषार्थकर्तव्यतायामपवादानुपपत्तेः पुरुषार्थोमयाकर्तव्यइ
त्येवंविधोध्यवसायः पुरुषार्थकर्तव्यतोध्यते तद्गुणावप्रकृतेः
कथमेवंविधोध्यवसायः अस्तिचेदध्यवसायःकथंजडत्वम्॥

पा॰
ता॰
२४

उच्यते अनुलोमप्रतिलोमपरिणामहेतोः सहजमशक्तिद्वयमस्ति
तदेव पुरुषार्थकर्तव्यतोच्यते सा च पुरुषेण तादात्म्यापन्नप्रकृतेः सहज-
मेव न त्वागमहेतोरिमहाभूतपर्यन्तोऽस्याश्च विकृतिभावेन यानुलोमः परि
णामः पुनः स्वकारणानुप्रवेशलक्षणस्तु प्रतिलोमः परिणा
मः इत्येवं पुरुषस्य भोगसमाप्तेः सहजशक्तिद्वयसद्भावात् कृता
र्था प्रकृतिः न पुनः परिणाममारभते एवं विधार्थं च पुरुषार्थकर्त
व्यतायोगस्याप्यपि प्रकृतेः कादाचित्कत्वानुपपत्तिः नन्वीदृशी शक्तिः
सहजैव प्रधानस्यास्ति नास्ति मोक्षो नाशाद्यभिमतानापत्तेः किम
नेन सन्तानस्यार्थनीयमनेन द्रष्टापारकत्वादस्यासानर्थक्यम् उच्यते
योऽयं प्रकृतिपुरुषयोर्नैसर्गिको भोग्यभोक्तृभावलक्षणः संयोगः त-
स्मिन्सति व्यक्तचेतनतया प्रकृतेः कर्तृत्वाभिमानात् दुःखानुभवे स
निकृष्टोऽस्मि यद् दुःखनिवृत्तिः कथं मम स्यादिति भवत्येवायं वि-
मर्शः प्रतोऽस्य दुःखनिवृत्त्युपायोपदेशकशास्त्रोपदेशापायेन यास्यस्य
प्रधानस्य तथाभूतमेव च कर्माणि नु रूपं च वैदिकं च शास्त्रोपदेशस्य
विषयः दर्शनात्तीर्थे वं विधपवविद्यास्वभावः शास्त्राभिधीयते
स च मोक्षोपायतामानपववियास्वभावः शास्त्रेभिः सहकारिण
मणमपेक्ष्य मोक्षाख्यफलमासादयति सर्वाण्येव च कार्याणि सा
मग्रीसामग्र्यामादयन्ति तस्मात् तस्य च प्रतिलोमपरिणामहेतो
णोपायस्य मोक्षात्तस्य कार्यस्य दृष्टसामग्रीप्रभवेण निश्चिता-
प्रकारान्तरेणानुपपत्तेः अनन्ता विनाकर्म भवितुमर्हति अतः
सिद्धमेतत्संक्रान्तविषयोपरागमभिव्यक्तचिच्छायं बुद्धिसत्त्वं विष-
यनिश्चयद्वारेण समग्रं लोकयात्रां निर्वाहयतीति एवं विधमेव चित्त
मधिष्ठाता भाता सम्वेदनं वित्तं वित्तमात्रं च जगदित्येवं प्रगल्भाः।
प्रस्तभोपि तथा भवति ॥ ननु एवंविधादेव चित्तात्सकलव्यवहार-
यनिर्वृत्तिः कथं प्रमाणशून्यो लोकेऽस्य ग्रहणमपगस्यतः त्याशयाह सू-
त्रि प्रमाणमाह तदनेकवासनाभिश्चित्रमपि परार्थं संहत्यकारित्व
त्वमपि नानारूपमपि परार्थं परस्यात्मनो भोक्तृभोगापवर्गलक्ष
णमर्थं साधयतीति कुतः संहत्यकारित्वात् संहत्य संभूय मिलि
त्वार्थक्रियाकारित्वात् यच्च संहत्यार्थक्रियाकारि तत्परार्थं दृष्ट
म् यथा शय्यासनादि सत्वरजस्तमांसि च चित्तलक्षणपरिणाम-
भाञ्जि संहत्यकारीणि अतः परार्थानि यस्तु परः स पुरुषः न तु यथा
दृष्टान्ते शय्यासनादीनां परेण शरीरेण तादात्म्यं वत्तमपलक्ष्यम्

तद्दृष्टान्तबलेन तादृश एव परः सिध्यति याद्दृशाच्छभवतां परोऽसं
हतरूपोऽभिप्रेतस्तादृशो न स्यात्सिद्धेः यः परिहृ विषयविघातकोऽह
न्तः उच्यते यद्यपि सत्त्वमात्रेण परार्थमात्रत्वेन व्याप्तिर्गृहीता ता
थापि सत्त्वादिविलक्षणधर्मिपर्यालोचनया तद्विलक्षण एव परः सि
ध्यति यथा चन्दनवनशिखिविनिर्गताद्विलक्षणाद्धूमाच्चन्दनवह्निरनुमी
यमानेऽन्यस्माद्वह्नेर्विलक्षणाद्धूमादप्रभवः प्रतीयते एवमिहा
पि विलक्षणचेतनेऽस्य परार्थ्येनमीयमाने तथाविध एव भोक्ता
धिष्ठाता परश्चिन्मात्ररूपोऽसंहतः सिध्यति यदि वा तस्य परत्वे
सर्वोत्कृष्टत्वमेव प्रतीयते तथा हि तामसेभ्यो विषयेभ्यः प्र
कृष्यन्ते इन्द्रियाणि ततोऽपि प्रकृष्टं सत्त्वं प्रकाशरूपेण स्थापयितुः प्र
काशः प्रकाशविशेषलक्षणः सचिद्रूप एव भवति इत्यस्य कृतलतस
संहतत्वम् इदानीं शास्त्रफलं कैवल्यं निर्णेतुं दशभिः सूत्रै
रुपक्रमते विशेषदर्शिन आत्मभावभावनानिवृत्तिः ॥ एवं सत्त्वपुरुष
योरन्यत्वे साधिते यस्तयोर्विशेषं पश्यति अहमस्मादन्य इत्येवंरू
पम् तस्य ज्ञातचित्तस्वरूपस्य चित्ते या आत्मभावना सा निवर्तते
चित्तमेव कर्तृ ज्ञातृ भोक्तृ इत्यभिमानो निवर्तते ॥ तस्मिन्सति
किं भवतीत्याह तदा कैवल्यप्राग्भारं चित्तम् यदस्याज्ञाननिम्नं बहि
र्मुखं विषयोपभोगफलं चित्तमासीत् तदिदानीं विवेकनिम्न
विवेकमार्गवाहकं तन्मुखं कैवल्यप्राग्भारं कैवल्यफलं कैवल्यप्राग्भ
वाभिमुखं पद्यते इति अस्मिंश्च विवेकवाहिनि चित्ते येऽन्तरायाः प्रादुर्भ
वन्ति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह तच्छिद्रेषु प्रत्य
यान्तराणि संस्कारेभ्यः तस्मिन्समाधौ स्थितस्य छिद्रेषु अन्तरालेषु यानि
प्रत्ययान्तराणि व्युत्थानरूपाणि ज्ञानानि प्राक्तनेभ्यः व्युत्थानानुभव
जेभ्यः संस्कारेभ्योऽहं ममेत्येवंरूपाणि क्षीयमाणेभ्यः प्रभवन्ति ॥
हानोपायः पूर्वमेवोक्त इत्याह हानमेषां क्लेशवदुक्तम् यथा क्ले
शानामविद्यादीनां हानं पूर्वमुक्तम् तथा संस्काराणामपि कर्तव्यं
यथा ते ज्ञानाग्निना प्लुष्टा दग्धबीजकल्पाः न पुनश्चित्तभूमौ प्ररोहं
लभन्ते तथा संस्कारा अपि एवं प्रत्ययान्तरानुदयेन स्थिरीभूते समा
धौ यादृशस्य योगिनः समाधिप्रकर्षप्राप्तिर्भवति तथाविधमुपा
यमाह प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधि :
प्रसंख्यानं यावतां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविल
क्षणस्वरूपपरिभावनम् तस्मिन्नप्यकुसीदस्य फलपरिभावम

पा॰
ता॰
४५
45

प्रकारविवेकख्यातेः परिशेषाद्धर्ममेघः समाधिर्भवति प्रकृष्टमशु
क्लकृष्णं धर्मं परमपुरुषार्थसाधकं मेहति सिंचति इति धर्ममेघः अनेन
प्रकृष्टस्य धर्मस्यैव ज्ञानहेतुत्वमित्युपपादितं भवति ॥ तस्माद्धर्म
मेघात्किं भवतीत्यत आह ततः क्लेशकर्मनिवृत्तिः क्लेशानाम
विद्यादीनामभिनिवेशान्तानां कर्मणां च शुक्लादिभेदेन त्रिविधानां
ज्ञानोदयात्पूर्वपूर्वकारणनिवृत्तौ निवृत्तिर्भवतीत्यर्थः ॥ निवृत्ते
षु तेषु किं भवतीत्याह तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्याज्ज्ञे
यमल्पम् ॥ आव्रियते चित्तमेभिरित्यावरणानि क्लेशाः तेभ्योऽपेत
स्य तद्विरहितस्य ज्ञानस्य शारगगनप्रतिमस्यानंतत्वाद्वस्तुज्ञेय
मल्पं गगने खद्योतवद्भवति अक्लेशेनैव संवेद्यते येनानातिस्फुटः ॥ ततः
किमित्यत आह ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ॥
कृतार्थानां भोगापवर्गलक्षणः पुरुषार्थो यैस्ते कृतार्था गु
णाः सत्त्वरजस्तमांसि तेषां परिणामश्चापुरुषसमाप्तेरानुलोम्येन प्रा
तिलोम्येन चांगांगिभावस्थितिलक्षणमाह क्षणप्रतियोगी परिणा
मापरांतनिर्ग्राह्यः क्रमः अनुभूतेषु पश्चात्संकलनया ग्राह्यो गृह्यते स
क्षणानां क्रम उच्यते नह्यननुभूतेषु क्षणेषु क्रमः परिज्ञातुं शक्यः
इदानीं फलभूतस्य कैवल्यस्यासाधारणं स्वरूपमाह पुरुषार्थशून्या
नां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति ॥
समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां प्रतिप्रसवः प्राति
लोम्येन समाप्तौ विकारानुदयो यद्वा चितिशक्तेर्वृत्तिसारूप्यनिवृ
त्तौ स्वरूपमात्रेणावस्थानं तत्कैवल्यमुच्यते न केवलस्य स्वदर्शने
तेऽपि तः पुरुषः कैवल्यावस्थायामेवंभूतो यावद्दर्शनं तेषामपि विस
र्गमाणमेवं रूपप्राप्यावतिष्ठते नत्वाद्दि संसारदशायामात्मकर्तृत्व
भोक्तृत्वानुसंधानमयः प्रतीयते प्रत्यगात्माय येमकः तोऽत्र तत्त्वा
विवेचनस्यात्तदा तानक्षणानामेवायात्मसंधानस्यात कृतत्वात्
कृतात्मनामप्रसंगाच्च यदि येनैव प्रागुपदिष्टमतः स्थितं कर्म तस्मै
व भोगमभिलषेत् तदा हि तान्हि प्राप्तिपरिहारानोपादानलक्षणस्या
नुसंधानेनैव व्याप्तत्वात् ज्ञानलक्षणस्यानुसंधानशून्यत्वाद
नुसंधानाभावे कस्यचिद्व्यवहारस्यानुपपत्तेः कर्तृभोक्तृनुसंधाना
यस्य आत्मेति व्यवस्थापितः सो ऽत्र दशायां तु सकलग्राह्यग्राहककल
नाशून्यत्वव्यवहाराभावाच्चितन्यमात्रमेव तस्यावशिष्यते तच्चेतन्य
चितिमात्रत्वेनैवोपपद्यते न पुनरात्मसंवेदनेन यस्माद्धि विषय

द्रूपसमर्थत्वमेव चिद्रूपेणात्मग्राहकत्वम् अथ चित्तमायाग्राह
मायोग्यमिति गृह्यते स्वरूपग्रहणमात्मग्रहणमिति न पुनर्योगपद
तत्त्वं हि मनुष्यत्वे तल्लक्षणव्यापारस्य परस्परं विलक्षणो कर्तृ-
त्वाकर्तृत्वाश्रित्वरूपतैवावतिष्ठते अतो मोक्षावस्थायां निहतापि
कारेणु चिन्मात्ररूपतात्मावतिष्ठते इत्येवयुक्तम् संसारदशा
यां तु एवंभूतस्यैव कर्तृत्वं भोक्तृत्वमनुसंधातृत्वं च सर्वमुपप
द्यते तथाहि योयं शक्त्या सहानादिनैसर्गिकः स्वभोग्यभोग्य
भावलक्षणस्सम्बन्धो विवेकः इति मूले उक्तमित्युक्तानि पुरुषार्थ
कर्तृत्वानात्मरूपेणात्रिदयसंभावे यामर्दनादिरूपापरिणतिः॥
त्वयायोगे सति यदात्मनोपि प्रागत्वे विज्ञायामसमर्थेण सामर्थ्य
म् बुद्धिसत्त्वस्य च विज्ञायायग्रहणसामर्थ्यम् चिदवष्टम्भायात्र
बुद्धेः यायं कर्तृत्वभोक्तृत्वाध्यवसायः तत एव सर्वस्यात्मस्था
नष्टर्वं स्याव्यवहारस्यानिष्पत्तेः किमन्यैः फलाभिः कल्पनाजा-
लैः यदि पुनरेवंभूतमार्गव्यतिरेकेणापारमार्थिकमात्मनः क
र्तृत्वादिधर्मीक्रियते तदास्य परिणामित्वप्रसंगः परिणामि-
त्वाच्चानित्यत्वेन स्यात्मत्वमेव न स्यात् नहेकस्मिन्नेव समये प-
केनैव रूपेण परस्परविरुद्धानुभवस्सम्भवति यस्यामवस्थाया
मात्मसंवेत्तेस्सुखं मन्यते तस्यानुभवितृत्वं न तस्यामेवावस्थाया
म् दुःखेनानुभवत्वम् अतो वस्थायानानात्वात्तदभिन्नस्यावस्थाव
तोपि नानात्वम् अतएव पातञ्जलवादिभिः सांख्यैरात्मनः स
दैव संसारदशायां मोक्षदशायां चैकरूपत्वमंगीक्रियते ॥ ये
त्वेदान्तवादिनस्त्रिदानन्दमय ब्रह्मात्मानो मोक्षमभिमन्यन्ते तेषां
तयुक्तः पक्षः तथाहि आनन्दस्य सुखरूपत्वात्सुखस्य च संवेदन
वेद्यतयैव प्रतिभासात्संवेद्यमानत्वं च संवेदनव्यतिरेकेणानु
पपन्नमिति संवेदनसंवेद्ययोरभ्युपगमाद्द्वैतहानिः अथ
सुखात्मकत्वमेव न स्यात् तेन नहि हृदयमीप्सामात्रानुपपन्नम् न
नहि संवेद्यसंवेदनव्यतिरेके भवति सुखमिति किंच वेदान्तवादिभिः
कर्मात्मापरात्मभेदेन द्विविधात्मा विद्यते तत्र येनैव रूपेणास्य
सुखदुःखभोक्तृत्वं कर्मात्मनस्तेनैव रूपेण यदि परमात्मनः स्यात्
तदा कर्मात्मवत् परमात्मनः परिणामित्वमविद्यास्वभावत्वं च स्या
त् अथ येन तस्य सांसारिकभोक्तृत्वम् किं तेन रूपभोक्तृत्वपदमीनतया
विभागत्वेन स्वीकरोति तदास्य सर्वगतानुप्रवेशः आनन्दरूपताच

पा
ना॰
२६

अवैमेव निराकृता किंचाविद्यास्वभावत्वेनिःस्वभावत्वात्कर्मे-
त्मनोकः शास्त्राधिकारी न तावत्रित्यमुक्तत्वात्परमात्मा नाप्य-
विद्यास्वभावत्वात्कर्मात्मा तत्र समस्तकलशास्त्रवैयर्थ्यप्रसंगः
अविद्यामयत्वेच जगतोंगीक्रियमाणे कस्याविद्येति विचार्यते
न तावत्परमात्मनो नित्यनिर्मुक्तत्वात् अविद्यारूपत्वाच्च कर्मा-
त्मनोपि निस्स्वभावतयाशशविषाणप्रायत्वे कथमविद्यास-
बंधः अथोच्यते एतदविद्यायामविद्यात्वम् यदविचार्यतरम-
णीयत्वेनामयैव हि विचारेणादित्यस्पृष्टनीहारवद्विलयमुपया-
तिसैवाविद्येत्युच्यते नैवम् यद्वस्तुकिंचित्कार्यंकरोति तद-
वश्यंकृतचिद्भिन्नमभिन्नवावक्तव्यम् अविद्यायाश्चसमस्तल
क्षणप्रपंचकार्यकर्तृत्वमंगीकर्तव्यम् तस्मिन्नस्यापियद्यत
वाच्यमुच्यते ततः कस्यचिदपि वाच्यत्वेनस्यात् ब्रह्मणोप्यवा-
च्यत्वप्रसक्तिः तस्मिद्दृष्टिदृष्टात्तत्वरूपताया अतिरेकेणतामयदा-
त्मनोरूपमुपपद्यते अपि दृष्टात्तत्वे च विरूपत्वमेवतस्मातिरिक्त-
स्यसर्वापर्मा हि वक्तानान्नुपपत्तेः येरपिनैयायिकादिभिरा-
त्माचेतनायोगाञ्चेतनइष्यते चेतनापिमनासंयोगजा तथा
हि इच्छेत्तानप्रयत्नादयोगुणास्तस्यवत्वद्धारदृष्टायामात्मम-
नःसंयोगादुत्पद्यते तैरेवागुणैःसर्यत्ताताकर्त्ताभोक्तेतिव्यप-
दिश्यते सोहेतन्मिथ्याज्ञाननिवृत्तौतन्मूलानांदोषाणामपि-
निवृत्तेस्तेषांबुद्ध्यादीनांविशेषगुणानामत्यंतोच्छित्तेः स्वरूप
मात्रप्रतिष्ठत्वमात्मनोंगीकृतम् तेषांनयुक्तःपक्षः यतस्त
स्येदृशावस्थायांकिमात्मानात्मत्वम् व्यापकत्वादयोगुणा आ
काशादीनामपिसंतिअतस्तद्वैलक्षण्यकात्मनः किंचिद्रूप
मवश्यमंगीकर्तव्यम् आत्मत्वजातियोगःनिचेत् सर्वस्यैवहि स
जात्यतियोगसंभवति अतोजडेभ्योवैलक्षण्यमात्मनोवश्य
मंगीकर्तव्यम् तच्चादृष्टात्तत्वेचिद्रूपतयैवघटते नान्यथा ये
रपिनयुक्तःपक्षः तथाहि अहंप्रत्ययग्राह्य आत्मा इतितेषाम-
नित्या अतोऽत्यपेककर्तृत्वकर्मत्वेचात्मनएववनचैतद्विरुद्धत्वादु-
पपद्यते यदि हि विरुद्धधर्माध्यासेतत्तदेकम् यथाभावाभावौ वि
रुद्धौ च कर्तृत्वकर्मत्वे अथोच्यतेनकर्तृत्वकर्मत्वयोर्विरोधः किं-
तु करणकर्मणोस्तयोः केनेतदुक्तम् विरुद्धधर्मायामस्यान्तत्वं-
लात्करणत्वयोरविरोधोनकर्तृत्वकर्मत्वयोः तस्माद्रूपम

याग्राह्यत्वे परिचित्यात्मनोपि ग्राह्यत्वमेवोपपन्नम् तच्चैतन्नत्व
मेव येऽपि द्रव्यपर्यायभेदादात्मनो व्यापकस्य शरीरपरिणामस्य
परिणामित्वमिच्छन्ति तेषामज्ञानपराहत एव पक्षः परिणामि
त्वे चिद्रूपताक्षतिः चिद्रूपताभावाच्च किमात्मानमात्मत्वम् तस्मा-
दात्मन आत्मत्वमिच्छता चिद्रूपत्वमेवाङ्गीकर्तव्यम् तथापि ग्राह्य-
त्वमेव केचित्कर्तृरूपमात्मानमिच्छन्ति तथाहि विषय
साक्षिध्येयात्तानलक्षणाक्रियासमन्वयात्तथाविधोऽसौ स्वरूपेप्र
काशरूपतया प्रतिभासते विषयस्य ग्राह्यत्वेन तया आत्मा ग्राह-
कत्वेन तदसहेतानामीत्येवं तथाः समन्वयैः क्रियायाश्च का
रणं कर्तैव भवतीत्यर्थः कर्तृत्वे भोक्तृत्वे चात्मनो चिद्रूपमिति
तदनुपपन्नम् यस्मात्तासां संवित्तीनां विकल्पत्वे युगपत्स्थित्य
नेक्रमेणाक युगपत्कर्तृत्वे तत्तेनैककर्तृत्वेन स्यात् अथ क्रमे
णकर्तृत्वे तदेकस्य रूपस्य सदैव सन्निहितत्वात्सर्वमेकफले
मेकरूपं स्यात् अथ नानारूपेण तस्य कर्तृत्वम् तदा परिणामि
त्वादचिद्रूपत्वम् अतश्चिद्रूपतामात्मन इच्छता तस्मात्कर्तृत्व
मङ्गीकर्तव्यम् यादृशमस्माभिरुक्तं कर्तृत्वमात्मनः प्रतिपा
दितम् कूटस्थनित्यचिद्रूपस्य तदेवोपपन्नम् एतेन स्वप्रकाश
स्यात्मनो विषयसंवित्तिद्वारा ग्राहकमभिव्यज्यत इति ये वदन्ति
तेऽप्यनेनैव निराकृताः केचिद्विमर्शव्यतिरेकेण चिद्रूपत्वमात्म
नो निरूपयितुं शक्यम् तद्धि किल वैलक्षण्यं चिद्रूपत्वमनु-
ते न च विमर्शव्यतिरेकेण निरूप्यमाणम् नान्यथा च लिङ्गते त
दनुपपन्नम् इदमिदंरूपमेतद्रूपमिति यो विचारः स विमर्श एव नि
सचास्मिता व्यतिरेकेणोत्थानमेव न लभते तथाहि आत्मनि-
रुपत्तायमानो विमर्शाक्षमेव न लभते इत्यनेनाकारेण संवेद्य-
ते तत्वा द्रष्टृत्वमित्रस्यात्मलक्षणस्यार्थस्य तत्र स्फुरणात्
विकल्परूपता निष्क्रमः विकल्पश्चाध्यवसायात्मा वदयमीत
विद्रुमः कूटस्थनित्यत्वेन चितेः सदैकरूपता ग्राहकानुप्र
वेशः तदेतेन सविमर्शत्वमात्मनः प्रतिपादयता बुद्धिरेवा
त्मत्वेन प्राप्ते प्रतिपादिता न प्रकाशात्मनः परस्य पुरुषस्य स्व
रूपमवगतमिति इत्थं सर्वेषु पिदर्शनेषु ग्राह्यत्वेन चिद्रूप
तात्मनो रूपमुपपद्यते ग्राह्यत्वे चाचिद्रूपत्वम् तत्र
ग्राहकत्वमेव चिद्रूपतया परापि हत्ति तदेवमर्थतो नयति

पा
ता॰
१२

नचैवेननापिहितेनतेदेवसकलव्यवहारयोग्यंभवति एवंचस
तिकृतकृत्यत्वात्प्रधानस्यव्यापारनिवृत्तौपरात्मनः कैवल्य
मस्माभिरुक्तम् नहिद्रष्टृदर्शनानांतत्त्वानामपितन्मात्रागतिःत
स्मादिदमेवयुक्तम् वृत्तिसारूप्यपरिहारेणस्वरूपप्रतिष्ठा॥
चितिशक्तेः कैवल्यम् तदेवंसिद्धंतेनात्मनःस्वरूपप्रतिष्ठानिर्णामसं
वेशिसिद्धिमूलभूतानांसमाधिसत्वादिमभिधायजात्यंतरपरिणा
मलक्षणंस्यचसिद्धिविशेषस्यप्रकृतापूरमेवकारणमुप
पाद्यधर्मादीनांप्रतिबंधकमात्रत्वमापन्नमितिनिदर्शयन
मीणांचित्तानामस्मितामात्रादुद्भवइत्युक्त्वायोगिचित्तमेवा
न्यादृक्कमितिप्रदर्श्ययोगिचित्तस्यचित्तान्तरवैलक्षण्यमः
भिधायतत्कर्मणामलौकिकत्वेनोपपाद्यविपाककार्यका
रणयोर्वैक्यप्रतिपादनेनव्यवहितानामपिवासनानामानंत
र्यमुपपाद्यतासामानंत्येपिहेतुफलादिद्वारेणहानमुपद
र्श्य अतीतादिषुधर्माणांसद्भावमुपपाद्यविज्ञानवादंनिरा
कृत्यसाकारवादंप्रतिष्ठाप्यपुरुषस्यज्ञातृत्वमुक्त्वाचित्त
द्वारेणसकलव्यवहारनिष्पत्तिमुपपाद्यपुरुषसिद्धिप्र
माणमुपदर्श्यकैवल्यनिर्णयायदशभिःसूत्रैःक्रमेणोपयो
गिनिश्चानभिधायशास्त्रान्तरेऽप्येतदेवकैवल्यमित्युपपाद्यकै
वल्यस्वरूपंनिर्णीतमितिव्याकृतः कैवल्यपादश्चतुर्थः॥
मेवंयस्ययशाःप्रतापवामतेः पातालतलमेवानतिप्रभूष्यन्त
कूटेषुसूर्दस्तदनालोपविशीर्णतः यद्यज्ञाद्यवमाध्यगावेस
ममेवाद्देवतापिश्रिता सश्रीभोजपतिःफणाधिपतिकृतन्व
येषुवर्त्तिर्व्यधात्॥ ॥ इतिश्रीधारेश्वरवि— रचितायांरा
जमार्तंडकैवल्याभिधायांपातंजलयोगशास्त्रवृत्तौकैवल्य
पादश्चतुर्थः समाप्तायंभोजवृत्तिः॥ ॥